Pettah,[1] and in 1825, Vīrarāghava's great-grandson Kumāra Pārthasārathi put forth a claim to the wardenship of this temple.[2]

It is unfortunate that the manuscript is incomplete and in the portion available there is no mention of some more of the important temples of the city, such as the Kapālīśvara temple at Mylapore But it can be seen from the available portion that the whole work is permeated with the atmosphere of temples and that the building of a temple or maintaining its charities or conducting its festivals was considered to be the chief act of piety and patronage on the part of a well-to-do person.

This was one of the most outstanding characteristics of the City nobles observed by the foreigners Pigot wrote to the Company's Directors towards the end of 1756: ". . . in this country, men who are fond of showing their wealth and grandeur have as yet found no better means of displaying them than by the building of temples." [3]

THE CITY AND ITS TOPOGRAPHY

It is interesting to examine the configuration of the city of Madras at the time of the SDV which frequently calls it Cennapurī (pp. 1, 3, 5, 51, 64, 66 and 92) and once by the common name Pattana (p. 67, v. 84) by which it is well known in South

[1] Love, II, 239

[2] *Guide to the Records of the Madras District*, p. 219

[3] Love, II, 503.

India As the work opens it gives the two broad divisions of the City, the urban area within the Town Wall (*Prākāra*, pp. 7, 27) and the gardens and villages outside.

The Town Wall (Prākāra)

The interlocutors and the patrons are described more than once as going out of the *Prākāra* (p. 7, l. 2 and p. 27, l 8). This Prākāra refers to the Wall which was raised by the English Company as part of the fortifications of the Town, of which there are now meagre vestiges, including the name *Wall Tax Road* surviving to this day. The beginnings of the Wall are to be traced to the mud fortification dating as early as 1673 (Love, I, 149, 284 ff.)[1] which was repaired and improved from time to time. Plans for the construction of regular ramparts were taken up in 1764 and the erection of the ramparts was completed in 1770 The Wall, which was three and a half miles long, extended on the west and north of the Fort and urban area (Love, II, 603). The English realized the cost of raising this Wall by imposing a *tax* on the houses and properties within the walled area (hence the name Wall Tax) and this they justified in their despatch to the Directors of the Company as "the most reasonable and equitable way". (Love, III, 5).

[1] See also Macleane, *Manual of the Administration of the Madras Presidency*, II, p. 91.

Gardens in the City

The SDV frequently mentions the big gardens owned by the City-magnates outside the Wall (pp. 7, 27). The greater part of the City outside the Wall seems to have been filled with gardens; an early map of the City (Pitt's of 1710-11) marks a number of these, and still earlier even the urban area within the Wall had many gardens. The SDV speaks of gardens owned by Kālingarāja (pp. 7 ff. and 76 ff.), Śrīrangarāja (pp. 10, 12), Vedācala (p. 27), and Pindikūru Venkaṭādri (p. 65). According to the descriptions in the text, these gardens were intended for relaxation and had rest-houses, plantations, deer and other animals, and tanks (p. 8); the owners went there regularly for recreation which included baths in the tank (pp. 25, 83), dinner parties, *Sadas*-meetings, listening to music, etc ; the public too appear to have had free access to these gardens (pp. 7 ff.).

Solomon's account of Madras for 1699-1700[1] speaks of the gardens full of fruit beyond the 'Black Town'. Writing to a friend at home, in August 1774, P. D Stanhope referred to the general attractiveness of Madras and said, " Every person who can afford it has a country retreat at the distance of a few miles, which is called a garden-house, and is filled up with peculiar elegance. . . ."[2] In 1780, in the Choultry Plain alone there were five to six hundred garden-houses. These gardens and garden-houses being a sign of opulence,

[1] Love, II, 76.
[2] *Ibid.*, III, 80.

Englishmen started imitating the local nobles and began acquiring and raising such garden-houses for themselves; this became quite a fashion and the Company Directors thought that the owning of these garden-houses promoted extravagance and turned down some applications from their men who desired them.[1] But the Company itself owned garden-houses in the town, Muthialpet (three here, one being a fruit-garden), Peddanaickenpetta, Chepauk and the Mount. Love refers to over two hundred garden-houses, most of them owned by Englishmen. Many of these gardens of Madras, which really made it a City of gardens, had existed for a long time, and it is only in the last quarter of a century that they have been rapidly and systematically destroyed

Parts of the City

The actual localities in and around the City mentioned in the SDV are: Tiruvellore (Vīksāraṇya), Toṭṭikkalai (Kalaśa), Nuṅgampākkam (Nuṅgapurī), Tirunīrmalai (Toyādri), Tiruvoṟṟiyūr (Ādhipurī), and Maṇali—all these on the outskirts; within the city, Coral Merchant Street (Pravālanagarī) in Muthialpet, Triplicane (Bṛndāranya, Kairaviṇī) and Mahāpurī (p. 72, v. 100). Inside the fortified area, Kṣepaṇa-skanda-vighneśvara-vīthī is mentioned, but this street no longer exists. It cannot be determined whether the Puṣpakānana or Pṛthupuṣpakānana mentioned in connection with the patron Gopāla was a place inside

[1] *Ibid.*, II, 615.

the City or in its environs.[1] The term Pākal-bhūmi-pati is used on p. 53 (v 35). Pākal may have reference to a place but it is yet to be identified.

The Mahāpurī mentioned as a place one has to cross on the way from Tiruvorriyūr to Triplicane appears from the description to be a place where troops were stationed From Talboys Wheeler's Map of Madras of 1733,[2] this Mahāpurī could be identified as Peddanayakanpettah, the area on the west of Muthialpet; Pedda meaning in Telugu ' big ', owing to exigencies of metre or brevity, the place may have been called Mahāpurī Or from the description of the layout of the city as in the Map of 1798,[3] Mahāpurī may be identified as Periamet, the Sanskrit and Tamil names being closer in this case (*Periya = Mahā*).

The Navasthala, which is more clearly described (p. 56) as a place of military troops, may refer to the Pudupākkam area (*Pudu = Nava*). But it seems to me that Navasthala refers to Puducceri or Pondicherry, the French Headquarters from where there were incursions of French troops on Madras city. The description in the text that the soldiers in the retinue appeared like troops ' descended ' from Navasthala would support this supposition.

[1] While nothing can be said as to the identity of this place, it should be remembered that some of the old villages or places in the City or its environs might have disappeared; e g., Veerasanoor, an area contiguous to Pudupākkam on its southwest had disappeared even in 1755 (Love, III, 57).

[2] See Love, II, end.

[3] *Ibid.*, III, end.

The Nuṅgampākkam Lake

In the description of Nungampākkam the text says that the patrons went out with their retinue to the *Padma-saras* (p 44, l 7) to enjoy a bath. This refers to a feature of the City which no longer exists Mylapore and Nungampākkam were originally bound by big tanks. The long tank of Nungampākkam stretched as far as Chetpet village, as can be seen from a map of old Madras of 1798.[1] The present Mambalam was a low-lying water-logged area, and all around the villages of Nuṅgampākkam, Teynampet and Royapettah were still under wet cultivation in 1798 Nuṅgampākkam, Teynampet and Royapettah were bound on the west by the long tank and on the east by the sea.[2]

GLIMPSES OF LIFE

Processions

Each section of our work starts with a procession consisting of the patrons accompanied by a large retinue. This, as we can verify from other records of those days, was the normal style in which the important persons went about on all occasions, ordinary or ceremonial. The English, too, imitated this practice and we find that in the Mayor's procession (17th Aug. 1727),[3] the party was headed by men on horse and on foot, accompanied by

[1] See Love, III, 531 ff.

[2] *Ibid.*, II, 504. See also *Guide to the Records of the Madras District* where the long tanks of Nungampākkam and Mylapore are mentioned and also the bursting of their bunds on one occasion (pp. 76, 197).

[3] Love, II, 242.

European military music, and immediately behind them went dancing girls and a group of Indian musicians.

Flags

In the Nuṅgampākkam section (pp. 45 ff) the SDV describes a distinct colour of tent cloth and a specific flag for each magnate. Kāliṅgarāja had a tent made of *red* cloth and marked by a flag with a *Swan* (v. 14; also p. 77, v 112). Śrīraṅga's tent was *white* and had a *Garuda* on its flag. Vedācala's tent was *black* and carried a *Bull*-flag. The Swan, Garuḍa and Bull were evidently chosen because of their being the vehicles (*vāhana-s*) of Brahmā, Visnu and Śiva; the colours of the tents, red, white and black, representing the *guṇa-s*, *Rajas*, *Sattva* and *Tamas*, are also associated with the Hindu Trinity. Whether the particular colours and flags mentioned here are factual or not, the distinguished families of merchants and landlords connected with the Company appear to have had distinct flags; in the Nuṅgampākkam temple inscription of Deva Nāyaka, referred to previously, his family is said to have had a *Plough* (*meḻi*) on their flag. But if this was the general ensign of the Tulu Vellalas, Vedācala, who was also of the same community, should have had the same Plough-emblem We may, therefore, suppose that while characteristic community-flags were known, the author in the SDV uses also poetic imagination in specifying some of these flags.[1]

[1] Kāliṅgarāja's Swan-flag is again referred to on p. 77, as being carried on his elephant.

The Time-gun

In chapter V, p 31, the text mentions that Vedācala and his friends started on their morning excursion even before the sound of the gun was heard (*Śataghnīke* [*gho*]*sanāt pūrvameva*). This is probably a reference to the time-gun, the firing of which had been introduced by the Company The time-gun, which Madras knew till recently, was fired in the early days at different hours in the morning and the reference in the SDV must be to its firing soon after daybreak The description here is of events, not within the city, but in a neighbouring village and whether the report of the canon in Madras or the Mount was heard there or not, the author might have naturally referred to it as the mark of the dawn.

Famine and Scarcity

In Chapter III the conversation turns upon the important topic of social service and amelioration of the suffering of the people. Ativivekin says (p 14) that the hardship of beggars and mendicants had been relieved by Śrīraṅga who had provided for their feeding. Vivekin then refers to the scarcity of clothing upon which Ativivekin mentions Kāliṅgarāja as having provided clothes for the poor. These may be taken as referring generally to the charitable disposition of the patrons described, especially because, close upon this, the *dharma* of building or maintaining the Śiva temple is mentioned as having been discharged by the patron Vedācala.

These patrons were known also for their generosity and humanitarian work While in some of the Company's letters and papers we are told that at the time of famine or scarcity in the City the natives did not subscribe adequately to relief work,[1] from the SDV we see that such a complaint was unfounded, not only is such an attitude foreign to the tradition of patronage and help which Indian aristocracy had always embodied in itself, but we are expressly told that two of the patrons figuring in the SDV did much to relieve the scarcity of food and clothing in the city As our work says about one of these nobles (p. 66, ll. 4-5), there was not one *dharma* which he did not do and also there was no ostentation about his doing it.

These observations on scarcity of food and clothing in the City and the relief given by the rich citizens may also contain an echo of the famine conditions that prevailed in Madras more than once about the time of the SDV In 1779-81 and 1781-83, there were spells of famine caused by the incursion of Hyder Ali[2] Again, the monsoon failed continuously between 1804 and 1807, and the City witnessed a mounting death-rate in these four years. In his description of the Great Famine (1781-82), Captain Innes Munro refers to the philanthropic efforts of the public and

[1] Love, III, 231. During the Great Famine, the Churchwardens wrote to Government on 24th May 1782 that the "List of Black Subscribers" showed "how inadequately they have contributed to the Relief of the distressed. . ."

[2] Love, III, 229-236, 558.

the subscriptions given by the Indian Dubashes, Accountants, Sowcars, etc., which went a long way to relieve the suffering,[1] a fact which is confirmed by the description in the text of the relief afforded by Raṅgarāja and Kāliṅgarāja by gifts of food and clothing.

The English

One of the chief elements of interest in the SDV is that it deals with Madras under the Company (*śvetamukhapālitā*, p. 2) and contains references to the English and sidelights on life in the City as it developed under this foreign impact. Elsewhere [2] I have drawn attention to the treatment of the English of those early days in contemporary Sanskrit literature. After the transfer of the country to the crown and the consolidation of British authority, the rulers arranged for eulogies on themselves and their empire to be composed by the Sanskrit Pandits and writers, even as the latter would have done for any new local king. But the first independent mention of the English in Sanskrit writings of the early Company days is not favourable to them. The Europeans, like their predecessors the Muslims, were referred to as *Mleccha* and *Hūṇa*. The *Ānandaraṅga-campū* refers to the English as the all-devouring whales (*timingila-s*). The *Viśvaguṇādarśa* sets forth their leading objectionable traits, though it does not fail to

[1] MTC, pp. 80-81.

[2] See my "Notices of Madras in Two Sanskrit Works", MTC, pp. 107-112, and my ed. of the *Ānandaraṅgavijaya-campū*.

balance them by paying a tribute to their merits.[1] In our text, the English are referred to as *Hūṇa* (p. 78, 93, 97) or by the more common name for the European *Śvetamukha* or *Sitāsya*, (the whites or the whitefaced ones, pp. 2, 90).

That the ascendancy of the foreign power was detrimental to indigenous culture and to *dharma* and that Brahmins came to be looked down upon and the support available to them was getting reduced are voiced in the *Viśvaguṇādarśa* and the SDV. In the latter, the interlocutors discuss (pp. 80-81) how their affluent and influential citizens could allow the growth of the power of these inferior people (*nīca-uddhati*), which is detrimental to the maintenance of *dharma*; and they console themselves by comparing the ascendancy of the English to similar periodic ascendancy of evil, under Rāvana and others. Even as the work opens, there is a dialogue (pp. 4-5) bearing on the drastic way a poor Brahmin scholar of Kāñcī was dealt with by the authorities

The Company had a number of local gentlemen of standing through whom the English transacted their business. These agents or Indian representatives went by the name 'Dubash', and the Governor, the military and commercial divisions, various officers—all had their own Dubashes. We are acquainted with some of the distinguished Indians who held this office of Dubash in diverse departments

[1] See my "Notices of Madras in Two Sanskrit Works", MTC, p. 108.

of the Company. Kāliṅgarāja is said to be influential enough to cause fear in the hearts of the English (p. 78, v. 115); Colla Ravanappa Chetti is described as a wizard in dealing with the English (*sitāsya-mohana-paṭu*, p. 90, v. 149); some capable Brahmins were also recruited by the English for helping them, like the highly learned Giryappa and Venkaṭanātha.

By reason of this association with the English, these City-magnates kept large retinues, developed a liking for Western music, and went out for rides in the morning, etc. Vedācala goes out like this on horse-back, with numerous hounds, and accompanied by English ladies (*yavanīyoṣā-s*, p. 31, l. 9), who had decked themselves with wild flowers.

श्रीः

सर्वदेवविलासः

[प्रथमाश्वासः]

(हेर)म्बं कलयामि सर्वजनतासेव्यं सुभाव्यं सदा
विघ्नध्वंसविधानपूर्वकमनोऽभीष्टप्रदानाय तम् ।
यं सर्वैर्विधिविष्णुमुख्यविबुधैस्संपूजयद्भिः फलम्
सम्यग्विघ्नविघातपूर्वकतया संप्राप्यते कामितम्[1] ॥ १ ॥

यो वै वेदमहाटवीतटनटद्बर्हीश्वरः शोभते
यश्चाशेषजगज्जनिस्थितिलयाधानेन संराजते ।
योऽपि श्रीपतिभारतीपतिमुखामर्त्यालिमृग्याङ्घ्रिकः
सोऽयं मामकमिष्टमाशु घटयेच्छ्रीचन्द्रचूडामणिः ॥ २ ॥

श्रीमच्छङ्करसूरिपौत्रपदभाक्छ्रीरामसूर्यात्मजः
सोऽहं चेन्नपुरीन्द्रतोषणधिया[2] कुर्वे प्रबन्धं जवात् ।
एतं सत्पुरुषाः कवीन्द्रमणयः संवीक्ष्य नन्दन्तु ते
कारुण्यान्मयि नीरसं च सरसं कुर्वन्त्विम[3] प्रार्थये* (?) ॥ ३ ॥

टिप्पणी

१. कामितं वाञ्छितं; फलमित्यनेनान्वयः । २. चेन्नपुरी अद्य मद्रास् इति प्रसिद्धा । तत्र विराजमानप्रभुसंप्रीणनबुद्ध्या । ३. इमं प्रबन्धम् ।

---

* MS. भार्गवे.

[1]नाम प्रबन्धस्य च **सर्वदेवविलास** इत्यद्भुतमातनोमि ।
यतोऽत्र पुर्यां निखिलामराणां नरात्मना कथ्यत एव सत्ता ॥ ४ ॥

जयति सा सकलजनानन्दकरी गिरीन्द्रनिभकरीन्द्रधुरीणपरिवारिता, [2]सरीसृपरिपुरयाध(:)कु(र्वद्)हरीश्वरपरीतसुमन्दुरा, अलकेव [3]धनपतिराजिता, अमरावतीव [4]विबुधावलीशोभिता, अयोध्येव रामाभिरामा, काञ्चीव कनककामाक्ष्याश्रिता[5], मधुरेव [6]सुन्दरेश्वराधिष्ठिता, काशीव [6]विश्वनाथविराजिता, [7]मायेव विमुक्तिकामविप्रभूषिता, अवन्तिकेव सुराजभासुरा, द्वारकेव [8]रथाङ्गभृत्संवृता, कविकुलपूरिताप्यकविकुलपूरिता[9], [10]श्वेतमुखपालिताप्यश्वेतमुख-

(टि०) १. अत्र सर्वदेवानां चेन्नपुरीप्रधानपुरुषाणां ये विलासाः, तद्वर्णनं क्रियते; तेषां च प्रधानपुरुषाणा सर्वदेवावतारभूतत्वं च प्रतिपाद्यते; किंच चेन्नपुर्यां ये देवालयाः, तत्र विराजमानसर्वदेवानां विलासा: उत्सवाश्चात्र वर्ण्यन्ते; इत्थं त्रिधास्य ग्रन्थस्य युक्तमद्भुतं नाम सर्वदेवविलास इति । २. सरीसृपरिपुः गरुडः । रयो वेगः । हरिः अश्वः । ३. धनपतिः कुबेरः धनिकश्च । ४. विबुधा देवाः विद्वांसश्च । ५. चेन्नपुरीपक्षे कनकेन सुवर्णनिचयेन कामाक्षीभिः सुन्दरीभिश्चाश्रिता । ६. सुन्दरेश्वरः कोवूर्-सुन्दरेश इति तदानींतनो मद्रनगरीस्थः प्रभुः, येन वाग्गेयकारत्यागराजविषये महानादरः समदर्शि । विश्वनाथश्च तथैव अन्यः कोऽपि प्रभुः । अथवा सुन्दरा ईशाः प्रभवः, विश्वनाथाः राजान इत्यपि सामान्येन प्रभुवर्णनतया योज्यम् । ७. माया गया । चेन्नपुरीपक्षे विमुक्तिकामैः हूणाक्रमणात् विमुमुक्षुभिः विप्रैः भूषिता । ८. रथाङ्गभृत् कृष्णः । चेन्नपुरीपक्षे रथरूपसेनाङ्गभृतः राजानः प्रभवो वा; अथवा रथाङ्गं चक्रं, तद्भृतः चक्रवर्तिनः । ९. अः विष्णुः, को ब्रह्मा, विः परमात्मा, अकवीनां विविधदेवानां कुलैरालयैः पूरिता । १०. श्वेतमुखाः ऐरोपीयाः ।

पालिता[1], मित्रकरसंपूर्णाप्यमित्रकरसपूर्णा[2], हरिशिवानन्ददाप्यहरिशिवानन्ददा[3], मरकतेन्द्रनीलपद्मरागहीरमुखचारुतरमणिसारखचितदेदीप्यमाननर्महर्म्यतलविलस - द्धाटकमयपीठिकोपरिस्थितिराजत्कविपूजारतराजाधिकभोजाधिक[4] [त] **श्रीकालिङ्ग-राज - श्रीरङ्गराज - वेदाचल**महीपाल - **देवनायक** - मुखविभुमण्डलमण्डिता[5], लङ्कापुरादिहसनपण्डिता श्रीमच्चेन्नपुराभिधाना राजधानी ।

यद्राजद्वनितास्यवीक्षणभवद्व्रीभारधारी विधु-
    र्दुःखादात्तमहाक्षयस्तत इतो गच्छामि नेत्याह कम्[6] ।
कुप्यद्ब्रह्मपदाभिघातजनितं रन्ध्रं दरीदृश्यते
    गर्भे तस्य तदद्य मूढमनुजैः संकथ्यते ह्यन्यथा ॥ ५ ॥

यत्कामिनीचिकुरनिन्दितबर्हभारा
    लज्जाभराद्विपिनमापुरिमं विहाय ।
सर्वोत्तमं पुरवरं भुवि नीलकण्ठाः
    के वाधिकाः[7] परिभवे न तिरोभवेयुः ॥ ६ ॥

यद्योषित्कुचसाम्यमात्मसु न वेत्याशङ्क्य बोद्धुं महा-
    शैलैस्त्वं तु बहुत्वमेत्य रजतक्ष्माभृद् व्रजेमां पुरीम् ।

(टि०) १. अश्वेन इतं गतं येषां ते अश्वसादिनः तादृशैरन्यैर्भटैश्च पालिता । २. मित्रकरः सूर्यरश्मिः । अमित्रकरः शत्रुभिर्जितैः समर्प्यमाणो धनादिरूपः । ३. हरिशिवौ चेन्नपुरीदेवालयस्थौ देवौ । अहरिशिवेति सिंह-शृगालादिमृगैः शून्या । ४. राजाधिक इति सामान्येन राजभ्यः उत्कर्ष उक्तः ; भोजाधिक इति विशिष्टराजत आधिक्यमुक्तम् । अत्र मातृकायां 'त' इति अक्षरमेकमधिकम् । ५. कालिङ्गराजादयोऽत्रैवोपरि वर्ण्यमानाश्चेन्नपुरीप्रभवः । ६. कं विधिम् । ७. अधिकाः प्रमुखाः । "संभावितस्य चाकीर्तिर्मरणादतिरिच्यते" इति न्यायेन परिभवमसहमानास्तिरोभवेयुः ।

गत्वा तत्र परीक्षणं सकपटः कुर्वित्यलं प्रार्थितो
भूत्वा सोऽपि सुसौधराजिकपटात् तिष्ठत्यनेकात्मकः ॥ ७ ॥

यत्सौधराशि(जि)रहिमांशुगतेर्विरोधि-
न्यास्ते ततो भवति तस्य गतेर्विलम्बः ।
नो चेद्दिनस्य घटिकाधिकता निदाघे
कस्माद् भवेत् तदयमस्ति गतेर्विलम्बः ॥ ८ ॥

परस्परकथासक्तौ **विवेक्यतिविवेकिनौ** ।
पुरुषौ सर्वशास्त्रज्ञौ वर्तेते पुरि विश्रुतौ ॥ ९ ॥

अथ कदाचित् तयोः परस्परकथावादकेल्यां विवेकी अतिविवेकिनं प्रत्याह—'अहो अतिविवेकिन्! कथमत्र पुर्यां जीवनं चलति विदुषाम्?' इति।

अतिविवेकी—'अरे विवेकिन्! किं तत्र ज्ञायते भवता? तर्हि वदामि शृणु। **परशुरामाख्यः** सुधीः भवता ज्ञातोऽस्ति हि?'

विवेकी—'ज्ञाततर एव सः। किं तज्ज्ञानेन?'

अति०—'स कदाचिन्मन्निकटमेत्याब्रवीत्—"कथमहो अतिविवेकिन्! जीवनं न चलति! किं करोमि" इति। अनन्तरमहमवदम्—"पूर्विकाणां[1] भवतामेवैवं चेत्, किमुतान्येषाम्" इति। पुनश्चाह मां स एव सुधीः—"अस्यामेव वेलायामधिकार्युपद्रवः कश्चिदासीत्, पिशाचिकाग्रस्तस्य वृश्चिकसंदष्टतेव" इति। तदनन्तरं "कोऽयमधिकार्युपद्रवः, न ज्ञायते, उच्यताम्" इत्यपृच्छम्। तदुपर्यवोचत्—"काञ्च्याम् अस्मद्गुरुनिर्मितं सदनमेकमासीत्; तदधुना अतीव शिथिलमस्ति; अतो वदत्यधिकारी—"तत् सम्यक्कर्तुं शक्तिरस्ति चेत् क्रियताम्; नो चेद् अन्यमुखेन कारयामि; राजवीथ्यामेवं स्थितं चेत्

(टि०) १. पूर्विकाः कस्मिंश्चित्स्थाने चिराय निवसन्तः।

विकारदं[1] स्यात्" इति"। अनन्तरमहमवोचम्—"अधिकारिबलाद् अन्यस्तत् सम्यक् कुर्याच्चेत् करोतु; तद्व्यथेदानी कुतस्ते?" इति। अनन्तरमवादीत्— "कथं सहे* ? प्राणत्यागादपि बलवान् खलु भूत्याग †" इति। अनन्तरमहमवोचम्—"अतिकष्टं ते संजातम्" इति। तदनन्तरं किंचिदुक्तं मया— "कति सन्ति विद्वांसः? कति वा जीवन्ति चेन्नपुर्याम्? तव तु कुदिन कष्टमिदम् नो चेद्, भाग्यं कियत्तवेति मन्ये" इति। अनन्तरं क्षणमात्रं तूष्णीं स्थित्वा पुनश्च किंचिदारब्धं तदुपरि दयावशेन—"अहो परशुरामशास्त्रिन्! यद्यपि समर्थोऽसि, तथापि इदं न ज्ञायते हि भवता" इति। परशुरामः—"किं तत्?" अति०—"श्रोतव्यमुच्यते। **कालिङ्गमहाराज-श्रीरङ्गनायक-देवनायक-वेदाचलेश्वर**प्रभृतयो देवाः स्वीकृतमनुष्यरूपाः पुर्यामस्यां सर्वसंरक्षणार्थं तिष्ठन्ति। ततः किं भयं तव? मा भैषीः" इति। अहो विवेकिन्! पुनश्च पृष्टं परशुरामशास्त्रिणा "किं ते रसिकाः?" इति। तत्रोत्तरितं मया—"ते सर्वेऽपि देवाः मानुष्यरूपमापन्नाः सर्वज्ञाः। तत्रापि **श्रीरङ्गनायकः** संस्कृति(त?)ज्ञाभिमानी, तस्य अतिव्युत्पन्नत्वाद्" इति। परशुरामः—"तर्हि मया किं कर्तव्यम्" इत्याह।

विवेकिन्! तत्रोपायः कश्चित्तस्य प्रदर्शितः—

"काञ्च्यां सद्म मदीयमद्य शिथिलं तज्ज्ञातमासीत्तत-
स्तत्सम्यक्करणाय बुद्धिरभवत्तत्प्रार्थयामीश्वराः।
तत्तच्छक्त्यनुसारिणी ह्युपकृतिः कार्येति सर्वोत्तमाः
सपत्नैर्हि दरिद्रलोकविषये कार्या हि सा सत्तमैः ॥ १० ॥

इति तान् देवांशान् प्रभून् प्रार्थय।

(टि०) १. विकारदम असुन्दरमिति यावत्।

---

* MS. सखे

† MS भूत्यागः

तत्सम्यक्करणाय निष्कशतकादूर्ध्वं ह्यपेक्षास्पदं
तच्चानेकमुखेन लब्धुमुचितं यत्नः कृतो नित्यशः* ।
निर्विघ्नं सहसा यथा पुनरिदं कार्यं भवेदीश्वराः
श्रीमन्तः प्रभवो दयां कुरुत मय्यत्यन्तदीनोत्तमे ॥ ११ ॥"

इति । "तदर्थमपेक्षितद्रव्याभिधानपूर्वकप्रार्थनां च कुरु" इति ।'

वि०—'अनन्तरं किमकरोत्' इत्याह ।

अति०—"तथैव करोमि" इति ।

ततश्च विवेकी—'अहो अतिविवेकिन्! सार्थकमेव ते नाम । अन्यथा कथमीदृशोपायो ज्ञायते ।'

अति०—'किं परिहससि?'

वि०—'न न; सत्यमुक्तम् । पूज्ये त्वयि परिहासकथा कुतः?'

अति०—'विवेकिन्! ग्रीष्मस्त्वतीव बाधते खलु ।'

वि०—'किमेतत्? बुद्धिरपि वा तव?'

अति०—'किं त्वद्वन्महिष इति मन्यसे?'

वि०—'अत(एव) . . . असि अतिविवेकी! कर्तव्यं किम्? वद ।'

अति०—'कालः कष्टतरोऽस्ति । तथा हि—

निदाघकालोऽयमुदारभावं सदा भजेच्चेज्जनदाहमेव ।
वदामि कुर्यादिति दासवाक्यं मुदा शृणु ब्रह्मविदातपेऽस्मिन् ॥१२॥'

वि०—'तथैवास्ते कालः, सत्यम् । कृतस्य प्रश्नस्य उत्तरं न दत्तमेतावता ।'

---

* MS. नीत्यसं.

अति०—'यत्र कुत्रचित् **प्राकारात्**[1] बहिरुपवनप्रदेशे काल्यापनं कर्तव्यमिति भाति।'

वि०—'अतिविवेकिन्! तत् सम्यग् भातम्। तर्हि **कालिङ्गमहाराजस्य** उपवनं सर्वोत्तममस्ति, तत्र गच्छावः।'

अति०—'अथ किम्।'

अनन्तरमुभावपि तत्र जग्मतुः।

(इति) प्रथमाश्वासः।

[अथ द्वितीयाश्वासः]

(अति०)—

'अहो वनमिदं पुरस्सकलशाखिसान्द्रं नवं
ममापि च मनो बलाद्धरति पश्य वश्यात्मनः।
त्वदुक्तमिदमित्यलं मम तु भाति पूर्वं त्वया
सखे खलु निवेदितं सकललक्षणं दृश्यते॥ १॥'

वि०—'किं त्वया पूर्वमज्ञातमेतत्?'

अति०—'किं त्वद्वत्पिशाचः सर्वत्राटितु, येन तज्ज्ञानं स्यात्?'

वि०—'अतिविवेकीति नाम कथं प्राप्तं, केन वा दत्तम्?'

अति०—'आस्तामेतदप्रस्तुतम्।'

वि०—'तदेव।'

अति०—'तथा चेत् किंचिदुच्यते, श्रोतव्यम्।'

(टि०) १. प्राकारः तदानीं श्वेतैः स्वसालाभिरक्षणाय रचिता भित्तिः।

वि०—'अवहितोऽस्मि ।'

अति०—

'स्वनन्दनजयोद्भटं[1] भवति चेदमस्माद्[2] वनं
प्रविश्य निवसाम्यहं [3]हरिरितीह बुद्ध्येत्यलम् ।
कलिङ्गपतिरूपभाग्भजति वेद्मि सर्वोत्तमं
वनं भुवि घनं भवत्ययमपीह यस्मात्ततः ॥ २ ॥'

वि०—'किं वक्ष्यामि ते अतिविवेकित्वम् ?'

अति०—'तद्दर्शनमर्थात्तत्रैव भवेत् । किमावयोर्योगं[4] वक्ष्यामि ?'

वि०—'किमावयोरिति मामपि संगृह्णासि ? महापण्डितस्य अतिविवेकिनः सर्वमपि तवैव योगः ।'

इति परस्परं परिहासं कुर्वन्तौ तदेव वनं प्रविविशतुः ।

अति०—'पश्य विवेकिन् ! वनस्य रामणीयकम्—

यथा च पक्षिप्रकरैर्निकामं तथैव वृक्षप्रकरैः सुपूर्णम् ।
एवं मृगादिप्रकरैश्च जुष्टं पुष्टं तटाकप्रकरैरिदं तत् ॥ ३ ॥'

वि०—'अहो अतिविवेकिन् ! पूर्वमेवोक्तं खलु भवता नन्दनमप्यसदृशमेतस्येति ।'

अति०—'किमहो विवेकिन् ! महानुद्घोषः श्रूयते ?

बृंहितं हेषितं चैव पटहध्वनिरेव च ।
काहल्यादिनिनादश्च शब्दभेदश्च लक्ष्यते ॥ ४ ॥

ज्ञायते चातो महाराजोऽद्यागच्छतीति । संनद्धौ भवावः तद्दर्शनाय ।'

(टि०) १. नन्दनं देवोद्यानम् । २. अस्मात्; हेतोरिति शेषः । ३. हरिरिन्द्रः । ४. योगः भाग्ययोगः ।

वि०—'किं रथाद्याहरणेन भाव्यम्? किं वा भेर्यादिताडनेन? त्वमपि महाराज इव सर्वं वदसि।'

अति०—'किं रे धूर्त, सर्वत्र परिहासः क्रियते?'

वि०—'मास्तु कोपः, तथैव कुर्वः।'

इति संनद्धौ स्थितौ। महाराजोऽपि प्राविशत्तद्वनम्। अनन्तरमिमौ च महाराजं दृष्ट्वा तुष्टुवतुः—

'विष्णुर्वाथ शिवः समस्तजनकः श्रीपद्मभूर्वा भवा-
निन्द्रो वाथ च यक्षराज इति च ज्ञानं भवत्युत्कटम्।
कालिंगाधिप को भवान् वद न वा वक्तव्यम्, आसीत् प्रमा[1]
देवैः पूर्वनिवेदितैस्त्वमिति संसृष्टोऽसि नैजैर्गुणैः॥ ५॥' इति।

महाराजोऽपि

स्तुतिप्रसन्नहृदयः कालिङ्गाधिपतिर्महान्।
एताभ्यां वर्णलक्षाणि[2] प्रायच्छद् भोजवत्[3] स्वयम्॥ ६॥

इमौ च गृहीत्वा तानि संतुष्टहृदयौ तदनुज्ञापूर्वकमेव तदुद्याने विश्रान्तिमात्मानमनयताम्*।

(टि०) १. प्रमा सम्यग्ज्ञानम्; त्वं न विष्णुर्वा शिवो वा केवलः, किंतु तैरेव समेत्य निजैः स्वीयैर्गुणैः विशेषैः समुदितैः सृष्टः। २. वर्णलक्षाणि; 'अक्षरलक्षम्' इति प्रसिद्धं प्रत्यक्षरं कविभ्यो लक्षसंख्यामितधनसमर्पणम्। ३. भोजवत्; धाराधीशभोजमहाराजो हि तथा कविषु पक्षपाती उदारश्चासीत्।

* MS. corrupt अनीयताम्.

एवं कतिपयदिवसेषु गतेषु सत्सु विवेकी अतिविवेकिनं प्रत्याह— “अहो अतिविवेकिन्! एतदारामापेक्षयाधिकोऽप्यस्ति; स न ज्ञायते हि भवता?”

अति०—‘को वा सः? वक्तव्यः।’

वि०—‘सर्वजगद्रक्षणाय मानववेषधारी **श्रीरङ्गराज** एवात्रागत्य वर्तत इति भवताभिहितं खलु, तदीयः।’

अति०—‘तर्हि पूर्वमेव कुतो नोक्तम्। अस्तु तावत, इदानी वा तत्र गच्छावः।’

इत्युभावपि ययतुः।

अति०—

‘अहो वनं भाति महात्मनो वचोविदूरमानन्दकरं महामते।
त्वदुक्तमेतत् खलु पश्य पश्य तन्महीपमुख्यस्य समानमस्ति च ॥७॥’

वि०—‘अहो अतिविवेकिन्! किं वक्ष्यामि ते बुद्धिविशेषम्? तदेव।’

अति०—‘महाराजोऽपि तत्रैव वर्तत इति भाति।

अश्वांश्च नागांश्च रथांश्च पश्य बहूंश्च योधान् [1]नळिकाभिरामान्।
[2]शाटीगृहांश्चैव विवेकिराज किं पुण्यमत्यद्भुतमावयोश्च ॥ ८ ॥’

इति परस्परमानन्दतश्च संलापं कुर्वन्तौ गत्वा तमाराममलंचक्रतुः।

अति०—

‘एतच्चैत्ररथं बलात् परिभवत्य(त्य)द्भुतं नन्दनं
ह्यन्यच्चैवमशोककाननमुखं देवासुरेशैः कृतम्।

(टि०) १. नलिका साग्निकायसगोलकप्रक्षेपणी आङ्ग्लभाषायां ‘गन्’ इति प्रसिद्धा। २. शाटीगृहाः पटमण्डपानि।

उद्यानं तदहीन्द्रमुख्यमतिमद्वर्ण्यं च न स्यात् सखे
सत्येवं मनुजोऽस्य वर्णनविधौ को वा भवेत् पण्डितः ॥ ९ ॥

तदेतद्वर्णनविधौ आवयोर्विराम एव श्रेयान् ।'

वि०—'सत्यमुक्तम् । प्रभुं[वा]पश्यावो वा, मा वा[1] । वनवर्णनेऽशक्तिरिव, तत्राप्यशक्तिश्चेत् किं करोमि?'

अति०—'न हि वाचि अशक्तिमतो दृष्ट्यशक्तिः ।'

वि०—'नायं विशेषो ज्ञायतेऽनतिविवेकित्वान्मम ।'

अति०—'अहो विवेकिन्! सर्वदा परिहास एव दृष्टिः! कोऽयं स्वभावस्ते? इतः परं प्रभु वा त्वरया पश्यावः । प्रयाणोन्मुख इव भाति ।'

वि०—'अतिविवेकिन्! क्रियतां तथैव ।'

इत्युभावपि गत्वा महाराजमवालोकयताम् । आलोक्य प्रभुमाहतुः—

'अन्नं च विद्यां च धनं च यद्यत्
सर्वं च वाञ्छाविषयं जनानाम् ।
ददासि रङ्गेश महाप्रभो त्वं
त्वद्वच्च दातुं भुवि कोऽस्ति दक्षः ॥ १० ॥

किंच—

माहात्म्यं तव नारदादिमुनयो ब्रह्मादयो वा सुराः
वक्तुं शक्तियुता न मर्त्यपशवस्तत् किं वदेमावयोः ।
श्रीमद्रङ्गमहाप्रभो प्रणमतोः किंचिज्ज्ञजन्त्वोर्दयां
तूष्णीमेव कुरु प्रपन्नकरुणा निर्हेतुका सा हि ते ॥ ११ ॥'

(टि०) १. 'न वा' इति साधीयान् पाठः ।

इति तयोर्वचनमाकर्ण्य महाराजः **श्रीरङ्गराजो**ऽपि वर्णलक्षाण्यदात्। तदनु तावपि तद् गृहीत्वा मुदमपारां भेजाते। तदनन्तरं **श्रीरङ्गनायक**महाराजः समुत्पन्नजिगमिषः तावाह—'अहो विद्वांसौ! पुनश्चैकवारं युष्मद्दर्शनमाकाङ्क्षते मे मनः।' इत्युक्त्वा पुरं प्रति गतो महाराजः।

एतावपि तत्रोपवने निवासं चक्रतुः। तत्रान्तरे—

अति०—'अहो विवेकिन्! उपवनमेतत् पश्यावः प्रत्यवयवसंस्थानम्।' इति वनदर्शनायोद्यतावभूताम्।

अति०—'अहो विवेकिन्—

वापी कापि स्फुरति विमलैरम्बुभिः पूर्णगर्भा *
तापं पाप बत परिहरामीव वाचाह्वयन्ती।
इत्यासक्त्या भजत तदिमां पान्थलोकाः परं मां
गत्यात्रत्यामलजलवसत्पक्षिवाग्जृम्भणानाम् ॥ १२ ॥

किंच—

मनुष्यवीक्षाक्षणतो बभूवुर्येऽमी मृगा धावनशीलभाजः।
त एव संप्रत्यनिशं मनुष्यान् † संक्रीडयन्तो †ऽत्र हि संचरन्ति ॥१३॥

पश्य पश्य! अत्यद्भुतमिदमस्ति वनम्। अत्रैव स्थितिश्चेदावयोः, आवामेव देवेन्द्रौ; न संदेहः।'

वि०—'हे, अतिविवेकिन्! नाममात्र ते बृहत्! तत्कार्यं किमपि न दृश्यते!'

---

* MS र्भाः.

† MS scored and written over.

अति०—'किमहो! पुनश्चारब्धं वा धौर्त्यम्! पदे पदे बोधितमपि त्वां न मुञ्चति तत्। किं कर्तव्यम्?'

वि०—'क्षन्तव्यो मेऽपराधोऽतिविवेकिना त्वया। वर्षाकालः संप्राप्तः। संसारस्तु कथ वाभूदिति चिन्तालेशोऽपि नास्ति। तूष्णीं वनं वर्णयन् तिष्ठसि खलु। तदर्थमुक्तम्। कोपं मा कृथाः।'

अति०—'त्वदुपरि कोपोऽपि वा? एतद्दर्शनजानन्देन परवशीकृतोऽस्मि। तस्मात् कालोऽप्ययमिति न बुद्धः[1]। तर्हि अतीव झटित्येव गच्छावः पुरीमिमाम्।'

इति सत्वरमेव गतावास्ताम्।

(इति) द्वितीय आश्वासः

[अथ तृतीयाश्वासः]

गच्छतोस्तु तयोरेकः कालवर्णनतत्परः।
बुद्धिमानाह तं चान्यमतिबुद्धियुतं नरम्॥ १॥

विवेकी—'हे अतिविवेकिन्! पश्य,

गर्जन्तोऽमी जलदनिवहाः पूर्वदिग्देशभागा-
दुज्जृम्भन्ते विरहिजनतागर्भ(र्व)निर्भेददक्षाः।
सौदामन्यः कनकलतिकाश्चारुरूपाः[2] समन्ता-
दुत्पद्यन्ते त्रिदशललनाबुद्धिदाः पश्य धीमन्॥ २॥

(टि०) १. कालोऽपि अयं वर्षाकाल इत्येवंरूप इति न बुद्धः। २. 'कनकलतिकाचारुरूपाः' इति चारुतरः पाठः।

संपन्नानां हि कालोऽयं सुखदो नेतरात्मनाम् ।
भिक्षुकाणां श्रमं वक्तुं ब्रह्मेह न भवेदलम् ॥ ३ ॥'

अतिविवेकी—'हे विवेकिन्! **श्रीरङ्गराट्कालिङ्गराजाभ्यामावां** देवेन्द्रीकृतौ; अतो न तद्भयमावयोः ।'

वि०—'भयकथाया वा का प्रसक्तिः? तथापीदमुच्यते श्रोतव्यम्—भिक्षुकाश्चाज्ञातश्रमा यथा भवेयुस्तथा कर्तव्यमिति ।'

अति०—'अहो विवेकिन्! भिक्षुकश्रमवार्ता वा क्वास्ति? श्रीमता **रङ्गराजेन** तस्य ध्वस्तत्वात् । सन्तु वा केचित् भिक्षुकाः श्रमिणः । तच्छ्रमपरिहारः कृतश्चेदप्यावाभ्यां तज्जन्यफलं तमेव व्रजेद्, आवयोस्तद्दत्तधनत्वात् । अस्तु; तथैव कुर्वः ।'

वि०—'यद्यपि अन्नाभावप्रयुक्तश्रमपरिहारः कृतः श्रीमता **रङ्गराजा**[1], तथापि वस्त्राभावप्रयुक्तश्रमो वर्तत एव तेषाम् । तथाहि—

अन्नमात्र ददात्येषां भिक्षुकाणां हि **रङ्गराट्** ।
वस्त्रदैन्यजमस्त्येव तेषां दुःखं सुदुःसहम् ॥ ४ ॥

तद्वा परिहराव आवाम्; नो चेदार्जितानां धनानां किं प्रयोजनम्?'

अति०—'तत्परिहारश्च कृत एव महाराजेन **कालिङ्गाधिपतिना** ।'

वि०—'मास्तु तद्धर्मद्वयमप्यावयोः; शिवालयादिधर्मो वा कर्तव्यः ।'

अति०—'सोऽपि धर्मः **वेदाचलमहीपाल**प्रभृतिभिराक्रान्तः । न कोऽपि वर्तते धर्म आवाभ्यां कर्तव्यः ।'

वि०—'किमहो अतिविवेकिन्! सर्वस्याप्युच्यते कुण्ठनम्? अतो भाति लोभो महानस्ति ते इति ।'

(टि०) १. रङ्गराट् शब्दस्य तृतीयान्तोऽय शब्दः ।

अति०—'किं तव धूर्तस्वभावो नैव गच्छति? किं बहुना? रहस्यार्थ उच्यते, श्रोतव्यम्।'

वि०—'को वा सः?'

अति०—

'कावेरीतटमण्डपान्तरतले[1] तूष्णीं सुखासीनतां
स्वीकृत्य स्थितमेव चेन्न जनतारक्षा भवेदित्ययम्।
मत्वा मानुषभावमेत्य सकलत्राणाय **रङ्गेश्वरः**
सर्वेषामपि चान्नमुख्यनिखिलाभीष्टार्थदातास्ति हि ॥ ५ ॥

रङ्गेशः परमेकको ऽत्र सकलत्राणाय तिष्ठत्यतो
मित्रस्यास्य सहाय एव सहसा भूयासमित्यादरात्।
श्रीमद्वेदगिरीश्वरोऽपि नरतामभ्येत्य लोकावनं
कर्तुं सर्वसुरेश्वरो जयति स श्रीचन्द्रचूडामणिः ॥ ६ ॥

विष्ण्वीशौ भवतो ममातिसुहृदौ तावद्य लोकावनं
कर्तुं मानुषभावमेत्य वसतः श्रीचेन्नपुर्यां ततः।
ब्रह्माहं च तथेति तत्र वसतिं प्राप्नोमि **कालिंगभू-
भृत्त्वं** सम्यगुपेत्य सर्वजगतां जागर्ति रक्षाविधौ ॥ ७ ॥

एवं सर्वेऽपि देवाः कंचित् कंचित् भावमालम्ब्य पुरीमिमामधितिष्ठन्ति। तत् कस्य को वा धर्मो वर्तते कर्तुम्? सर्वेऽपि तदधीना जाताः'।

वि०—'तथा चेदावां किं कुर्वः? तिष्ठतु तावदिदम्। किंचित् पृच्छामि। सम्यक् वक्तव्यं भवता निष्कपटम्।'

अति०—'भवद्विषयेऽपि वा तत्?'

वि०—'तद्युच्यते—

(टि०) १. श्रीरङ्गनाम्नि क्षेत्रे।

रहस्यमेतद् भवता कथं वा बुद्धं सुराणां (म)ह(तां) नरेण ।
देवोऽसि किं तेषु च मध्य एकः सर्वज्ञ इत्येव च नाम युक्तम् ॥८॥'

अति०—'त्वं शैशवं न मुञ्चसि । सहिष्णुना मया एवं सह्यते । अन्यश्चेत् प्रहरेत् खलु । किं कुर्यास्तदानीम्?'

वि०—'अस्ति खलु भवान् सहायः; अन्योऽपि वा कथं प्रहरेत्?'

अति०—'सम्यगनुष्ठीयतां शैशवकृत्यम् ।'

वि०—'अस्तु तावद्वृद्धता वा शिशुता वा; मदीयप्रश्नोत्तरं दीयतामतिवृद्धैर्भवद्भिः । उभयोरपि समवयस्कत्वात् परिहासः कृतश्चेत् को दोषः?'

अति०—'तर्हि तदेव कार्यमस्तु; सर्वदा ते प्रश्नोत्तरं ददामि । शृणु—पुरा कदाचित् किंचिद्व्यसनाक्रान्तचेतसा मया इष्टदेवता प्रार्थिता—"मम सौख्यं कदा दास्यसि, तमर्थं स्वप्ने वा अशरीरवाचा वा वक्तव्यमिति ।" तदानीमेव अशरीरवाचा उत्तरितं—"**श्रीरङ्गनायक-कालिग**महाराज-**वेदाचल**महीपालप्रभृतिरूपाः सर्वे देवा भविष्यन्ति । तदा ते सौख्यं महद् भविष्यति" इति । तदधुना ज्ञातमस्ति ।'

वि०—'तर्हि युक्तमेवैतत् यः स्वाधीनदेवताकः सोऽपि देव एव; न संदेहः । तस्मात्सर्वज्ञ एव भवानिति मन्ये ।'

अति०—'सर्वं ते दया ।'

वि०—

'अस्मिंश्च काले न हि सावकाशो[1] गृहाद्गृहं गन्तुमपि प्रजानाम् ।
[2]संपादनायाद्य मतिः कुतः स्यात् सुखानुभूतेरयमेव कालः ॥९॥'

(टि०) १. सावकाशः अवकाशार्थे द्राविडोक्तिच्छाया । २. संपादनशब्दः द्राविडप्रयोगानुसारेण अर्थसंपादनार्थे प्रयुक्तः ।

अति०—'अहो विवेकिन्! भवानेवातिविवेकी ; यतस्तत्तत्कालस्वभावमवेत्य वदसि ।'

वि०—'त्वदनुषङ्गबलादेव सर्वमित्यवेहि ।'

अति०—'विवेकिन्! त्वमपि सुखमनुभवितुमर्हसि । अहमपि तथैव करोमि ।'

इत्युभावपि गृहे एव सुखमतिष्ठताम् ।

तदनु कदाचित्,

दस्यवः पापकर्माणो निशीथेऽतिविवेकिनः ।
गृहं प्रविश्य यत्नेन सर्वं जह्रुर्नराधमाः ॥ १० ॥

तदनु निद्रोत्थितौ सत्यां पुरत एव भित्तिकायां चोरकृतद्वारमहर्निरीक्ष्य 'अहो विवेकिन्! दैवेन हतौ स्वः; सर्वमपहृतं दस्युभिः' इति सोद्घोषं वाक्ताडनं[1] कृतमतिविवेकिना । अन्तिकगृहस्थाः सर्वेऽपि ससम्भ्रममेवागताः । अनन्तरं साश्चर्यं पश्यन्तः स्थिताः सर्वे 'अहो दैवमेव बलवत्; किमन्यैः पुरुषकारादिभिः?' इत्यादिवाक्यैर्विवेक्यतिविवेकिनौ सम्यगाश्वास्य गताः ।

वि०—

'दैवं प्रधानं यत्र स्यान्मतं तत् साधु नेतरत् ।
अत्र युक्तिश्च वृत्तान्तः प्राकृतः स्यान्महामते ॥ ११ ॥'

अति०—'इदानी शास्त्रप्रसङ्गोऽपि वा? किं वदामि ते बुद्धिम्?'

वि०—श्रुत्वा सरोषम्—'अतिविवेकीति नाम केन राण्डेयेन कृतमतिमूढस्य?

(टि०) १. आस्ये हस्ताभ्यां ताडनम् ।

आर्जितस्य धनस्यास्य धर्म एव प्रयोजनम् ।
अन्यथा व्यर्थमेव स्यादित्युक्त हि मयाधम ॥ १२ ॥

तत्स्मृतिरपि ते नास्ति खलु । एवंभूतस्य तवातिविवेकीति नाम कथमागतम् ? तत्प्रयुक्तपूज्यत्वं वा कथमिदम् ? अत्याश्चर्यं वर्तते ! त्वत्सहवासः त्वत्समानामेवोचितः, न मादृशाम् ।'

इत्युक्त्वा ससंभ्रममेवोत्थाय शिरस्युत्तरीयं बद्ध्वा[1] गन्तुमारेभे ।

अति०—'अहो विवेकिन् ! अद्य प्रभृत्यतिविवेकित्वं सकलपूज्यतरत्वं च सर्वमपि भवत एवास्तु । बुद्धिमतां कोपप्रसक्तिः का ?'

इत्यादिवाक्यैः गम्यमानं[2] तं समाधाय संस्थापयामास । एवं स्थापितं तं विवेकिनं प्रत्याह—

'अहो विवेकिन् ! दैवेन हतौ स्वः खलु । इतः परं किं करिष्यावः ? कुटुम्बभरणेऽप्यशक्तिरागता हि । यत्र कुत्रचित् गन्तुमपि कालः प्रतिबन्धकः ।'

इत्युक्त्वा क्षणमात्रं तूष्णी स्थित्वा सोच्छ्वासम्—'अहो कालगतिं किं वक्ष्यामि ?

कालः साधुरयं भवेद्यदि तदा साध्यं त्वसाध्यं ध्रुवं
यश्चेदेवमसाधुरेष भुवने साध्यं त्वसाध्य तदा ।
यः सर्वाधिपतिं महेशमपि वा मुञ्चत्यहो किं सदा
तस्मै कालमहात्मने सुनितरामेषा नमःसन्ततिः ॥ १३ ॥'

इति बहुधा दुःखमनुभवति तस्मिन्नतिविवेकिनि,

(टि०) १. अयमपि द्राविडचेष्टोक्त्यनुवादः । २. गम्यो व्यङ्ग्यो मानः कोपः यस्य तम् । अथवा गच्छन्तमिति पाठ स्यात् ।

वि०—'अहो अतिविवेकिन्! कालः समीचीन एवागतः संप्रत्यावयोः।'

अति०—'तत्कथम्?'

वि०—'आगता मदिष्टदेवतेव शरत् भगवती। तथाहि—

इतश्च काशपुष्पाणि नद्यश्चेमा इतः सखे।
विकसन्त्यद्य संतार्या वर्तन्ते निर्मलोदकाः॥ १४॥

तस्माद्यत्र कुत्रचिद्गत्वा संपादयावः[1]।'

अति०—'यत्र कुत्रचिदिति कुतः? अत्रैव वर्तन्ते खलु देवा मनुष्यभावापन्नाः प्रभवः। तानेव द्रक्ष्यावः, न चान्यान्।'

इति तद्दर्शनाय संनद्धौ बभूवतुः।

(इति) तृतीयाश्वासः

[अथ चतुर्थाश्वासः]

(अतिविवेकी)—

'तेषु मध्ये महानेष **वेदाचल**महीपतिः।
तमेव पूर्वं पश्यावो विवेकिन्नद्भुतप्रभुम्॥ १॥'

विवेकी—'अहो अतिविवेकिन्! **कालिङ्गरङ्ग**महीपाल्योः सर्वोत्तमयोः पूर्वमेव दर्शनमभूत् खलु। नेदानीमेतद्दर्शनप्राथम्यं दोषाय।'

अति०—'तात्पर्यज्ञेष्वग्रगण्यो भवान्।'

(टि०) १. धनमिति शेष।

वि०—'तिष्ठतु नाम व्यर्थकालक्षेपः। प्रकृतमनुसरावः।'

तमेव महाराजं द्रष्टुमगच्छताम्।

वि०—'अहो, महाराजसद्मरत्नं क्वास्ते?'

अति०—'न ज्ञायते वा भवता? तर्ह्यत्याश्चर्यमेतत्। राज्याधिपत्यं कुर्वतां गृहमेवैवं चेत्, किमुतान्येषाम्? "अयं मार्जालोऽपीदं क्षीरं पिबेद्वा"[1] इति न्यायेन तिष्ठसि। तिष्ठ तथैव। त्वया यद्यत् पृच्छ्यते तस्य तस्योत्तरं दातुं हस्त बद्ध्वा[2] प्रतीक्ष्यते मया।'

वि०—'किमन्यत् कार्यम्? मूकश्चेत् तूष्णीं स्थातुं शक्यते।'

अति०—'मूकत्वमपि वा मम!'

वि०—'एवं व्यर्थवाक्कोलाहले तव श्रमलेशोऽपि न दृश्यते। मत्प्रश्नोत्तर-दानसमय एव सकलश्रमो भवति। अस्तु तावन्मयि विश्वासः।'

अति०—'अस्तु तर्ह्ययमेवोद्योगः सर्वदा मम। [3]**क्षेपणस्कन्दविघ्नेश्वर-वीथीम**लङ्कुर्वदास्ते तद्गृहं त्रिलोकप्रसिद्धम्।'

वि०—'तर्हि समीप एव।'

अति०—'अतिसमीप एवेति वक्तव्यम्। आस्तामिदम्; त्वरया गच्छावः। स महाराजः **कलशाख्यां**[4] स्वपुरीं प्रति जिगमिषुर्भवतीति श्रुतम्।'

वि०—'तर्हि तथैव कुर्वः।'

इति त्वरया गच्छद्भ्यां ताभ्यां महाराजस्य ध्वजगजो दृष्टः।

(टि०) १. अयं द्रविडाभाणकानुवादः; कपटसाधुतेत्यर्थे प्रवृत्तः। २. अन्योऽयं द्रविडोक्त्यनुवादः; हस्तबन्धपूर्वकप्रतीक्षा आश्रवत्वप्रति-पादिका। ३. इयं चेन्नपुर्या काचन वीथी। ४. चेन्नपुर्याः समीपे तिरुवेल्लूर्निकटे वर्तमानं 'तोट्टिक्कले' इति ख्यातं क्षेत्रम्।

वि०—'अहो अतिविवेकिन्! भवदुक्तं यथार्थमेवाभूत्। तथाहि—

अग्रे पश्य गिरीन्द्रसंनिभममुं कुम्भीन्द्रमत्युच्चलद्-
*राजत्केतनपाणियन्त्र(न्तृ)विलसत्पृष्ठं[1] बलिष्ठाह्वयम्।
सिन्दूरोज्ज्वलगण्डमण्डलगलद्दानाम्बुपूरोद्वलद्-
भृङ्गोत्तुङ्गनिनादनादितदिशाजालं सुलीलालयम्॥ २॥'

अति०—'अहो महाराजस्य साक्षाद्विजयलक्ष्मीरिव वर्ततेऽयं गजराजः। तस्मात् प्रस्थित एव महाराजः; न संदेहः। अतो नेदानीमेतद्दर्शनावकाशः। भवत्वेतद्दर्शनं कालान्तरे। अन्यमिदानीं द्रक्ष्यावः।'

वि०—'एतद्दर्शनमपि मास्तु; अन्यदर्शनमपि मास्तु; संसारव्यासङ्गोऽप्यास्ताम्[2]। इदानी यत्र कुत्रचिद्वेदिका(या)मुपरि स्थित्वा महाराजस्य प्रयाणारभटी पश्यावः।'

अति०—'अन्नपानादिकं वा विहाय एतद्दिदृक्षा कस्य न स्यात्?'

इत्युभावपि कस्यांचिद्वेदिकायामुपरि स्थित्वा द्रष्टुमारेभाते।

वि०—'किमेतस्य साम्राज्यम्! इन्द्रादीनामपि न स्याद् इति प्रतिभाति।'

अति०—'यदुच्यते भवता, तत्किमपि न श्रूयते बधिरस्येव मम। तथाहि—

(टि०) १. पाणियन्त्रं नाम किमिति न ज्ञायते। केतनपाणिश्चासौ यन्ता हस्तिपकश्च तेन विलसदिति तु अन्वयः सुकरः। अतः 'केतनपाणियन्तृ' इति पाठः स्यात्। २. एतादृशान् प्रभून् दृष्ट्वा, ततो दानमानादिकं लब्ध्वा, तन्मूलादस्मादृशां संसारयात्रा निर्वोढव्या वर्तते; एवं सति संसारव्यासङ्गिनोरावयोरेतादृशप्रभुदर्शने अश्रद्धा कथं भवत्विति तात्पर्यम्।

---

* MS. राजन्.

भेरीभाङ्कृतिकाहलीकलकलध्वानातिपीनात्मक-
[1]भ्राजत्सूर्यहिमांशुवाद्यसुततारावाभिभूता दिशः।
लोकाः स्वस्वनियोगकार्यकरणाशक्ता विमुक्ता इव
भ्रान्ता निश्चलतामुपेत्य बधिरास्तिष्ठन्ति तस्मादमी ॥ ३ ॥

तस्मात् भेर्यादिमहावाद्यदूरगमनपर्यन्तं तूष्णीं पश्यन्तौ स्थास्यावः।'

इति कर्णसमीपे [2]सोद्घोषमभिधाय तूष्णीं पश्यन्नेवातिष्ठत्। सोऽपि तथैव अकरोत्। भेर्यादिमहावाद्येषु किंचिद् दूरं गतेषु सत्सु परस्परालापकेलेः किंचिदवकाशे लब्धे विवेकी वक्तुमारेभे।

वि०—'पश्य, अतिविवेकिन्! इमान्—

खड्गोद्भासितपाणयो हरिहयोद्दामार्वदारोहणाः[3]
संनद्धाः खलु भृत्यकूटघटकास्तिष्ठन्ति केचिद्भटाः।
केचिच्चापि सुकुन्ततोमरमुखान्यत्यन्ततीक्ष्णायुधा-
न्यादायाखिलपादचारिण इमे शूराश्च राजोन्मुखाः[4] ॥ ४ ॥

किमेतस्यैश्वर्यम्! ईश्वरस्यापि दुर्लभमिव भाति।'

अति०—'तथैव। महाराजोऽप्यागच्छति महेन्द्र इव।

(टि०) १. 'सूर्यप्परै', 'चन्द्रप्परै' इति प्रसिद्धौ सूर्यबिम्बार्धचन्द्रबिम्बाकारौ पटहविशेषौ। २. प्रदेशस्य प्रास्थानिकपटहादिभिरतीव घोषाकुलत्वात्। ३. इन्द्राश्वोपमाश्वारूढाः। ४. केचन पदातयः प्रयाणदिगनभिमुखाः, किंतु प्रभ्वभिमुखाः सन्तः प्रतीपपदविन्यासा गच्छन्तीति भावः; अयमेव यात्रासु आतोद्यकाराणां समुदाचारः।

[1]'राजच्छ्री जयशीलनामककरीट्पृष्ठोपरिप्रोल्लस-
[2]द्धौदामध्यतलस्थितिप्रविलसद्वेदाचलेन्द्रं सखे ।
पश्चाद्भागनिषण्णराघवमहामात्यप्रियालापिना
सक्तश्रोत्रपुटद्वयातिविदितं पश्याभिरामाकृतिम् ॥ ५ ॥'

वि०—'महेन्द्रोऽपि नैतस्योपमानं स्यात् । प्रजाः पश्य*; समुद्र एव† वेलोल्लङ्घनमाचरन्निव भाति ।'

अति०—'एतद्दर्शनोत्साहस्तादृशः ।'

वि०—

'राज्ञस्तस्य गजोपरि प्रविलसत्सिंहासनस्थौ सखे
भ्राजन्तौ नरपुंगवौ विलसतः श्रेयस्विनौ पार्श्वयोः ।
कौ तौ ब्रूहि महाबलौ विबुधराडाभौ महाभूपते-
र्जिज्ञासा मम भूयसी भवति संकाशौ[3] समस्तैर्गुणैः ॥ ६ ॥'

अति०—'सम्यक् पृष्टं भवता ।'

इत्युक्त्वा सोत्साहम्,

'प्रभोरस्य महात्मानौ सोदरौ भासुराङ्गकौ ।
एतौ सर्वकलासारवेदिनौ विद्धि बुद्धिमन् ॥ ७ ॥

(टि०) १. पूर्वं द्वितीये श्लोके 'बलिष्ठाह्वयम्' इति विशेषितो वेदाचलप्रभोर्गजः । अत्र च 'जयशीलनामक' इति विशेषितः । बलिष्ठानामेव जयशीलतया परस्परं नासंबद्धे इमे नामनी कस्यापि भाषानाम्नः संस्कृतानुवाद इति भाति । २. हौदा इति गजोपरिस्थासनस्य पारसीकनाम (howdah). ३. समस्तैर्गुणैः सकाशौ मिथोऽनुरूपौ इति योज्यम् ।

* MS. पश्या. † येव.

कृष्णस्वामिमहीपालस्तयोरेकः परस्तथा ।

सुब्रह्मण्यमहीपाल इत्यवेहि महामते ॥ ८ ॥'

वि०—'सम्यग् गृहीतम् । एतद्दर्शनजानन्दोऽप्यपारो भवति । पुनश्च पृच्छामि, वक्तव्यं दयया—

अश्वद्वन्द्वयुते रथे लसति कः श्रीमान् नरो वाजिराट्-
कष्टाकृष्टरथे परश्च पुरुषः संदृश्यते, काविमौ ।'

अति०—

'एकस्तत्र च **वैदिलिङ्गनृपतिः सेनाधिराजः**, परो
धीमानित्य**रुणाचल**प्रभुमणिर्जानीहि **कोशाधिपः** ॥ ९ ॥'

वि०—'तत्प्रभुद्वयमवगतम् । पुनश्चायमेकः प्रभुरागच्छति । तज्ज्ञानं चापेक्षते ह्यात्मा । तथाहि—

प्रभोः समीपे गज(राज?)पृष्ठे
विभाति कोऽसौ चतुरः सुरूपः ।'

अति०—

'जानासि नैनं किमरे विवेकिन्
गानातिदक्षो दोरसामिनामा ॥ १० ॥'

वि०—'अयं तु ज्ञातः प्रसिद्धश्च । अमी चैके महाश्चर्यकरा दृश्यन्ते । पश्य पश्य,

असंख्याताश्च दृश्यन्ते गोरथास्तेषु के वद ।'

अति०—सकोपम्—

'ते तु के वा न जानामि [1]वागुपाधिर्न किं सखे ॥ ११ ॥

(टि०) १. वागुपाधिः वाचः पीडा । उपाधिशब्दः आध्यर्थे द्राविडप्रयोगमनुसृत्यात्र प्रयुक्तः ।

एतस्य विभवः केन वक्तव्यः स्यान्महीतले ।
समुद्रपारं यो वेत्ति कदाचिद्वक्तुमर्हति ॥ १२ ॥
'[1]तूष्णी किं बाधसे धीमन् पश्य चक्षुःप्रियं प्रभुम् ।
तथैव सोदरौ तस्य पश्यदानन्ददायिनौ ॥ १३ ॥'

तत्रान्तरे—

सर्वे चैव सुरा महेन्द्रसहिता वेदाचलेन्द्रं महा-
धर्मिष्ठं सबलं प्रयान्तमधुना द्रक्ष्याम इत्यादरात् ।
सङ्घीभूय समेत्य पुष्पनिकरानादाय कल्पद्रुमा-
द्राज्ञस्तस्य बलस्य चोपरि सदानन्दाद्ववर्षुः[2] परम् ॥ १४ ॥

विवेकी कुपितमपि सविनयमेव पृच्छति—

'वस्त्राच्छादनभासुराः सुशिबिका गच्छन्त्यसंख्याः सखे
तत्रान्तस्स्थितिशालिनः सुकृतिनस्ते के वदेमान् परम् ।
पृच्छाम्यन्यमहं भवन्तमधुना संत्यज्य कं वाधमं[3]
कोपं मा कुरु बाधते बुबुधिषा चैषा बलादेव माम् ॥ १५ ॥'

अतिविवेकी 'अयं शनिरिव न मुञ्चति इति[4]' मनसि कृत्वा पुनश्च प्रश्नोत्तरं दातुमारेभे—

'इमाः स्त्रियो निशान्तस्था राज्ञो रम्भाधिकाः सखे ।
कपटं ते हि जानामि जानन्नपि च पृच्छसि ॥ १६ ॥

(टि०) १. तूष्णींशब्दः 'शुम्मा' इति द्राविडपदस्यानुवादः । स च न मौनार्थे, किन्तु 'मुहुर्मुहुः' इत्यर्थे प्रयुक्तः । २. 'ववृषुः' इति भवितव्यम् । ३. भवन्त सन्त्यज्य अन्यं क वाधम पृच्छामि । अत्रापि द्रविडभाषणशैली अनूद्यते । ४. अत्रापि तथैव ।

सखे विवेकिन्! इदमप्याश्चर्यकरं पश्य--

उष्ट्राणामयुतं चैव वामीनामयुतं तथा।
पटसद्मादिभ[ा]रभृद् गच्छति प्रिय बुद्धिमन्॥ १७ ॥'

विवेकी पुनश्च प्रष्टुमारेभे--

'अयं च को वा नृपतेः समीपे गजोपरिस्थः प्रविभाति कामम्।'

अति०--

'अयं हि वेदान्तगुरुर्महात्मा साक्षाच्च लक्ष्मीपतिरित्यवेहि ॥१८॥'

विवेकी पुनश्च कंचित्पुरुषमुद्दिश्य पृच्छति--

'एष श्रीगजराजपृष्ठविलसत्सिंहासनस्थः सुधी-
रग्रे पश्य समापतत्यमितभाः सर्वज्ञति[1] ब्रूहि मे।'

अति०--

'एषस्तस्य (एषोऽप्यस्य)* महात्मनो नरपतेराचार्यभावोज्ज्वलो
- - †रामविदित्यवेहि[2] शितधीरत्यन्तविस्मयतिमान्॥ १९॥'

वि०--

'स महात्मायमेव! इदानीमेतद्दर्शनेन जन्म सार्थकमभूत्। को वायं महाराजेवास्ते' इति मनसि मत्वा, अनन्तरं प्रष्टुमारेभे--

(टि०) १. सर्वज्ञति; सर्वज्ञ इवाचरति। २. विद्; विद्वान्।

---

* The correct reading should be एषोऽप्यस्य; see below similar verse-line reading identically एषोऽप्यस्य महात्मनो नरपतेः

† Two letters are wanting in the MS and these may be 'वेङ्कट्', thus supplying the scholar's name in full as 'Venkatarāma'. In such cases, our author usually follows colloquial Tamil pronunciation, Venkatrāya and Venkatrāma.

'अत्यन्तोन्नतवाजिराजविलसन् राजेव चास्ते महान्
कोऽसौ छत्रसुचामरादिकलितोदारोपचारैर्युतः ।'

अति०—

'एषोऽप्यस्य महात्मनो नरपतेः श्रीश्रीनिवासाभिधो
गायी गानकलाविशारदमतिः ख्यातश्च किं पृच्छसि ॥२०॥'

वि०—'एतत्साम्राज्यं ब्रह्मापि वक्तुं न शक्नोतीत्युक्तं खलु, सत्यमेव तत्।'

एवं रीत्या स महाराजः समस्तविभवैः सह प्रस्थितोऽभवत् ।

अति०—'एतस्य महाराजस्योद्यानवनं[1] सर्वोत्कृष्टमास्ते। प्राकाराद् बहिः तदुद्देशेन गच्छति वा? आहोस्वित् कलशाख्यमहापुरी वर्तते, तां प्रति वा? अयमर्थः सम्यङ् न ज्ञायते । सखे भवता ज्ञातश्चेद् वद ।'

वि०—'मयापि सम्यङ् न ज्ञायते । कदाचिदेतत्कूटे[2] कश्चित् कंचित् पृष्टवान् । तदानीं केनचिदुत्तरितम्—"अखिलाण्डकोटिब्रह्माण्डनायकस्य सर्वजगत्सृष्टिस्थितिसंहारकारणस्य देवदेवस्य चिदम्बरेशस्यास्मिन् मास्युत्सवो भविष्यति । तदर्थं कलशाभिधानां राजधानीं प्रति गच्छति" इति । तच्छ्रुतं मया ।'

अति०—'तर्हि सत्यमेवैतत्, अस्मिन्मास्युत्सववार्ताया यथार्थत्वात् । इतः परमावाभ्यां किं कर्तव्यम्? सम्यगालोच्य वद ।'

वि०—'वक्तव्यं किं वर्तते? आवाभ्यामपि तत्रैव गन्तव्यम् । महोत्सवकाले जगदीश्वरदर्शनं कृतं चेत् जन्मसाफल्यमपि भवति । महाराजदर्शनमपि भवति तत्रैव; न संदेहः ।'

(टि०) १. उद्यानवनमिति द्राविडशैलीमनुसृतः पुनरुक्तप्रायः प्रयोगः । २. कूटे जनसङ्घाते; 'कूटो दम्भे समूहे च' इत्यजयः । 'कूट्टम्' इति द्राविडया च जनसंघाते प्रसिद्धम् ।

अति०—'भवतो यद्रोचते, तदेव ममापि[1] ।'

वि०—'तर्हि तथैव कुर्वः ।'

इति तां **कलशाख्य**महापुरीं प्रत्येव जग्मतुः ।

इति चतुर्थाश्वासः

[अथ पञ्चमाश्वासः]

गच्छतोस्तु तयोरासीत् सुदूरे तद्बलं तदा ।
तत्र गन्तुमशक्तौ तौ पूजार्थं कुत्रचित् स्थितौ ॥ १ ॥
अथ पूजां विधायैतौ मेनाते गन्तुमाशु ताम्[2] ।
तदा भेरीध्वनिस्ताभ्यां श्रुतश्चासीत्सुभाङ्कृतिः ॥ २ ॥

विवेकी—'अहो सखे, महाराजोऽपि प्रस्थितः; अस्यामेव रात्रौ भगवद्दर्शनाय पुरी प्रविशेदिति भाति । आवामपि त्वरया गतौ चेत्, भगवद्दर्शनमावयोरपि भवेदेव । अतो रयजितमनोगरुडौ गच्छावः ।'

इत्यतित्वरया विराजितयोस्तयोः पुरतो मत्तेभः कश्चित् बलाद्विमुक्तः कुन्ततोमराद्यायुधविशिष्टैर्भटैरनुधाव्यमानस्तन्निकटमागतः । तं दृष्ट्वा कांदिशीकौ बभूवतुः । अनन्तरं विवेक्यतिविवेकिनमाह—'इतःपरमागतमार्गमेव पश्यन्तौ[3] गच्छावः ; अलं संपादनाय[4] गत्वा ।'

इति सकम्पं रोदितुमारेभे ।

(टि०) १. अत्र चतुर्थीस्थाने षष्ठी प्रामादिकी । २. तां, कलशाख्यां पुरीम् । ३. अयं च द्रविडोक्त्यनुवादः । येन पथागतं तेन । ४. अर्थसंपादनायेत्यर्थः ।

अतिविवेकी—'भीतिं मुञ्च ; स तु पश्चादनुधावद्भिर्भटैर्गृहीतः ; पश्य, पशुरिव* गच्छति । एतावत्पर्यन्तमागत्य पुनश्च प्रतिनिवर्तन युक्तं न भवति । तस्मान्मा भै(षी): ।'

इति समाश्वास्य तं गृहीत्वैव पुनश्च गन्तुमुपचक्रमे ।

अथ तोषेण गच्छद्भ्यां ताभ्यां दृष्टा पुरी तदा ।
पताकाध्वजसंयुक्ता तोरणादिसुशोभिता ॥ ३ ॥

वि०—'अहो राजाज्ञां किं वक्ष्यामि । तत्राप्येतस्याज्ञातिबलवतीव भाति ; यत इतरेषां राज्ञां स्वसन्निधानेऽप्येवमाज्ञा न चलति । तथाहि†—

परिष्कृतेय प्रतिभाति सम्यग् विडम्बयन्तीव पुरं सुराणाम् ।
समस्तसंपद्विभवाभिरामा सुमस्तकप्रौढकरीन्द्रसान्द्रा ॥ ४ ॥

प्राकारभित्तिः परिखाभिरेषा समावृता संप्रति दृश्यते हि ।
हिरण्मयी देवसरित्परीतगिरीन्द्रविभ्राजदधित्यकेव ॥ ५ ॥'

अति०—'पूर्वमेवोक्त खलु—एतद्विभवः ईश्वरस्यापि दुर्लभ इति ।

इन्द्रोऽपरो नास्त्यमरावती चेत्येव मतिः कस्य न जायतेऽत्र[1] ।
किं वा बहूक्तेन फलं विवेकिन् सर्वावबुद्धार्थकथाप्ययुक्ता[2] ॥ ६ ॥'

वि०—'अयं कः अपर इव महाराजः प्रत्यागच्छत्यसंख्येयपदाति-संवृतोऽप्रमेयतुरङ्गीसङ्गतो गजोष्ट्रवाम्यादिभिर्बहुभिश्चोपशोभितः? अस्य महाराज-

(टि०) १. अत्र एतद्विलोकिनः कस्य एतत्प्रभोरन्य इन्द्रो नास्ति, एतत्पुरादन्या अमरावत्यपि नास्तीति मतिर्न जायते । २. सर्वावबुद्धार्थकथा-प्ययुक्ता, सम्यक् ज्ञातस्य विषयस्य प्रपञ्चनमनुचितम् इति भावः ।

* MS. पश्चेव

† MS. reads तथाहि before यत इतरेषाम् etc.

समानधर्मत्वादभियातिरिव[1] भाति। तस्माद् युद्धप्रसक्तिरपि भवेत्। इतः परमावां किं करिष्यावः? महद् भयमागतं खलु। पूर्वमेवागतं मार्गं पश्यन्तौ गच्छाव इति सर्वथोक्तमपि न श्रुतं भवता। इदानीं यदागच्छति, सर्वमनुभोक्तव्यमेव।'

इति बहुधा विलपन्तं त विवेकिनमाश्वासयामासातिविवेकी।

अति०—'अहो विवेकिन्! नायमभियातिः, किंत्वेतद्भृत्य एव; यतः सर्वमपि दूरत एव स्थापयित्वा चतुर्भिः पञ्चभिः सह एक एव सविनय आगच्छति।'

वि०—'कपटी चेत् तथैवागच्छेत्। किमेतावता शत्रुर्न भवतीति निर्णयः कथं स्यात्? [2]अनर्थमेकं भविष्यति, न संदेहः। नो चेत्, एतादृशविभवो भृत्यस्य कथं स्यात्?'

इति निराकृतोऽतिविवेकी तत्प्रत्ययार्थं समीपस्थं कंचित् पप्रच्छ 'अयं कः?' इति। तेनोक्तम्—'महाराजेनैव देशाधिपत्यकरणे नियुक्त एतत्प्रभुचक्रवर्तिदत्तमहाराजनामधेयः **श्रीवेंकटगिर्याख्य** सेवकः' इति। अथ तद्वचनादागतप्रत्ययः संतुष्टहृदयोऽभवद्विवेकी।

वि०—'पूर्णकुम्भं गृहीत्वा ब्राह्मणाश्च प्रत्यागच्छन्ति[3]। इतो दास्यः, इतोऽपि पौरजनाः सर्वेऽपि महाराजं प्रत्यागच्छन्ति।

अयं यथास्ते नरजन्मशाली तथेतरे चापि भवन्ति चेत् किम्।
पुण्येन जन्मान्तरकल्पितेन राजप्रसादः क्वचिदेव भूयात्॥ ७॥'

इति परस्परमालपन्तौ स्थितौ। तदनु महाराजोऽपि समस्तवाद्यैः समस्तोपचारैः सह सपरिवारः ससोदरः पुरीं तां प्रविवेश।

(टि०) १. अभियातिः समरार्थमागन्ता शत्रुः। २ अनर्थमिति नपुंसकप्रयोगः आपदर्थकः द्राविडीच्छायानुपाती। ३. प्रत्युद्गच्छन्तीत्यर्थः।

वेदाचलमहीपाले घण्टापथमुपेयुषि ।
जाता [1]देहीरिति प्रज्ञा सर्वासां पौरयोषिताम् ॥ ८ ॥

तदनु महाराजः सहोदराभ्यां सह [2]ग्रामप्रदक्षिणं कृत्वा जयशीलनाम्नो गजराजात् **राघवामात्येन** साकमवरुह्य छत्रचामराद्युपचार*विशिष्टस्वामात्य**राघवार्य**-दत्तकरावलम्बः गमनावि(ना)भूताधिकविलम्बः रुचिकृतरजताचलकन (?)[3] स्वसद्मासससाद ।

अथ प्रभाते शतघ्नीके(घो)षणात्[4] पूर्वमेवोत्थाय **राघवार्य**मन्त्रिणा साकं वाजिराजमारुह्य बहुभिर्विश्वकद्रुभिः[5] आसमन्तात् परिवृते, अश्वोत्त-मारोहणीभिः वनशिरीषकुसुमारचितकर्णभूषाभिः यवनीयोषाभिश्च[6] **वेदाचल**-महीपालचक्रवर्तिनि† मृगयाविनोदाय **वीक्षारण्यं**[7] गते सति, तेऽप्यत्यन्त-सुहृदो महात्मानः **श्रीरङ्गनायक-देवनायक-कालिङ्ग**महाराजप्रभृतयो रथगज-तुरगपदात्यात्मकचतुरङ्गविशिष्टैर्बलैः सह समेत्य तत्तन्निवासोचिततया निर्मितेषु सोप-चारं देशाधिपत्यनियुक्त-**वेङ्कटगिरिविप्रविभुना** प्रदर्शितेषु पटसद्मादिगृहेषु प्रविष्टाः सन्तः **कुम्भकोणनारायणी-तञ्जनगरमङ्गा**प्रभृतिभिर्वारयुवतिभिः

(टि०) १. देही इः इति पदच्छेदः । अस्य विष्णोरपत्यम् इः मन्मथः । वेदाचल उपेयुषि द्रष्ट्रीणा पौरयोषितामयं पुनश्च गृहीतदेहो मन्मथ आयाति इति प्रज्ञा जाता । २ ग्रामस्य प्रदक्षिणं परिक्रमण नाम विशिष्टजनसमागम-विवाहादिषु समाद्रियमाण आचारः । ३ कननमिति दीप्तिवाचकं पदमत्र कल्पयितु शक्यम् । ४. प्रभातसूचकः शतघ्नीस्फोटः अत्र अभिप्रेतः । ५ श्वभिः । ६. तदानीम् ऐरोपीयैस्सह वाणिज्यादिव्यवहारभृता प्रभूणा ऐरोपीयस्त्रियोऽपि मित्राणि अभूवन् । ७. वीक्षारण्यं तिरुवल्लूरक्षेत्रस्येदं नाम ।

---

* MS. The word चामर repeated. † MS वर्ति.

परिकल्पितचन्दनानुलेपनाः सभयभक्तिकामसमर्पितपुष्पहाराः, संगीतश्रवणानन्द-मनुभवन्तः परस्परं परिहासवार्ताकेलिमपि कुर्वन्तः श्रीमन्तः सुखमासामासुः । तदनन्तरं महाराजोऽपि—

वीक्षारण्यगतान् यज्ञदीक्षायुक्तान् मुनीश्वरान् ।
साक्षात्कृत्य नमश्चक्रे मोक्षायाद्भुततेजसः ॥ ९ ॥

मुनयोऽप्याशिषश्चक्रुः प्रणयोत्पूरितात्मकाः ।
'घेन योगश्च ते भूयाद्धनयोगान्महीपते[1] ॥ १० ॥'

तदनु महाराजः स्ववन्दनानन्तरक्षणोत्पन्नमुनीन्द्राशिषः शिरसा गृहीत्वा 'मृगयार्थं गच्छ' इति तैरभ्यनुज्ञातः किंचिद् दूरं गतः सन् मृगयूथं महद्ददर्श ।

[2]असद्देवधृते विधौ समलताबुद्धिं विधत्ते ततः
कूटस्थोऽयममीषु भूरिहरिणा राज्ञा हताः कोपिना ।
केचित्केचिदनन्तरं करुणया त्यक्ता मृगा नो हता
इत्यालोच्य निजाङ्गनानयनसादृश्योज्ज्वलास्तद्दृशः ॥ ११ ॥

तत्रान्तरे—

श्रुत्वा हेषितमत्यन्तरोषयुक्तो महाध्वनिः ।
शार्दूलः कश्चिदग्रेऽस्य प्रादुरासीन्महात्मनः ॥ १२ ॥

(टि०) १. इदं तेषामाशीर्वचनम्—धनयोगात् धनेन प्रवर्तितया विविधया शिवसेवया अन्ते शिवसायुज्यमस्तु इति । घेन शिवेन योगः । 'घो घटे हनने रुद्रे' इति अनेकार्थतिलके महीपः । २. अस्मद्देवः वेदाचलपूजितः शिवः, तेन शिरसि धृते विधौ चन्द्रे अमीषा मृगाणा कूटस्थो मृगः समलताबुद्धि मलयुक्तताबुद्धिं सकलङ्कमति विधत्ते इति कोपादमीषु हरिणेषु केचिद्धताः । केचित्तु स्वाङ्गनानयनसादृश्यं तन्मृगनयनेषु स्मरता करुणया त्यक्ता इति भावः ।

तदनन्तरम्—

मयि सति पुरुषव्याघ्रे व्याघ्रः कोऽसौ ममास्ति पुरतोऽभीः ।
इति निहतश्चैष रुषा शौर्यात् क्षितिभृद्वरेण बहुभूम्ना ॥ १३ ॥

इति सकलानपि मृगादीन् निहत्य पुनः प्रतिनिवृत्तो महाराजः पुरीं प्रविवेश ।

अथ कदाचित् स सुहृदः सर्वानपि **श्रीरङ्गनायक-देवनायक-कालिङ्ग-महाराज**प्रभृतीन् गृहीत्वा अखिलाण्डकोटिब्रह्माण्डनायकस्य देवदेवस्य विश्वाधिकस्य **श्रीचिदम्बरेश्वरस्य** दर्शनाय तदालयं प्रति गतोऽभूत् ।

तदनु सर्वेऽपि प्रभवः प्रदक्षिणानि बहूनि कृत्वा प्रणामांश्चासंख्यान् विधाय महादेवस्याप्रमेयमहिम्नः **कलशपुरीनाथस्य श्रीचिदम्बरेशस्य** संनिधिमुपेत्य बद्धाञ्जलिपुटाः सन्तः परमेश्वरं तं स्तोतुमारेभिरे ।

प्रथमं **श्रीकालिङ्ग**महाराजस्तुष्टाव—

'सेवायातसमस्तदेवमकुटप्रोद्भासिपुष्पासव-
स्रोतःप्रीतमनःस्वनन्मधुकरस्तोमः परं भासते ।
यद्ध्यानातिनिरस्तघुष्यदमितानम्रौघमूर्ताघवद्[1]
दद्याच्चन्द्रशिखामणिः **कलशपूरीशः**[2] **सभाराट्** सुखम् ॥१४॥'

अनन्तरं **श्रीरङ्गनायक**महाराजस्तथाकरोत्—

'सेवासंभ्रमविभ्रमामरशिरःपुष्पालिखेलन्महा-
लोलम्बावलिरब्जबन्धुतनयास्रोतोवहा[3] राजते ।

(टि०) १. मधुकरस्तोमः नमता भक्तानां निरस्यमानः अघौघ इव भासते । २. पूरीश इत्यत्र साधुता चिन्त्या । ३. अब्जबन्धुतनयास्रोतोवहा सूर्यपुत्री यमुनानदी ; भृङ्गावलेर्नीलवर्णत्वात्तथावर्णनम् ।

भेदायोपगतेव यस्य मनसः कंजारिमैत्रीजुषो[1]

दद्याच्चन्द्रशिखामणिः **कलशपूरीशः सभाराट्** सुखम् ॥१५॥ '

इति ।

तदनन्तरं **देवनायक**महीपालोऽपि—

' सेवासज्जहृदब्जनम्रनिखिलक्ष्मापालमौलिस्फुरद्-

गम्भीरोरुकिरीटलग्नसुमनोमालासु हेलाकरः ।

यत्पुत्रेष्टफलं तनोत्यलिचयस्तैर्नीत*मित्थं धियं[2]

दद्याच्चन्द्रशिखामणिः **कलशपूरीशः सभाराट्** सुखम् ॥१६॥ '

इति ।

तदनन्तरं **वेदाचल**महीपालोऽपि—

' पादाब्जप्रणतामरेन्द्रललनाधम्मिल्लमल्लीसुम-

स्तोमामन्दमरन्दतुन्दिलरवोद्दामालिदम्भात्तमः ।

नूनं य प्रति वक्तुमागतमिति त्याज्यः खलश्चन्द्रमा

दद्याच्चन्द्रशिखामणिः **कलशपूरीशः सभाराट्** सुखम् ॥१७॥ '

तदनु,

स्तुतिप्रसन्नो भगवान् महेशश्चिदम्बरेशः करुणाम्बुराशिः ।

(टि०) १. कंजारिः पद्मवैरी चन्द्रः, तन्मैत्रीजुषः चन्द्रमौलेः शिवस्य मनसो भेदायेत्यन्वयः । २. यत्पुत्रेष्टफलं शिवपुत्रस्य गणेशस्येष्टं फलं जम्बूफलम्; तत् नम्रक्ष्मापालैर्नीतमिति धियं तनोति । इत्थमिति, अलिजम्बूफलयोराकृतिवर्णसाम्यादेवमुत्प्रेक्षा । आगन्तव आश्रिताः प्रभूपसदनावसरे प्रभुसन्निवर्तमानबालकाना प्रियं किमपि फलं भक्ष्यं वाहरन्तीति लोकाचारः । तैः क्ष्मापालैः । नीतमानीतम् ।

* MS. र्नी doubtful ; lettering not clear.

प्रसादमेतेषु कृतं तदैव संसूचयामास च दीपपुष्पैः[1] ॥ १८ ॥'

ततस्ते सर्वेऽपि महीपालाः लब्धभगवत्प्रसादाः संतोषपरवशीकृतात्मानो बहिरेत्य ध्वजस्तम्भोपान्तप्रदेशे स्थिताः सन्तः तत्रत्यपूजकद्विजवरैः चन्दनपुष्पहारादिभिः कृतोपचाराः तेभ्यो द्विजेभ्यः तत्रत्यदासीनटगायनादिभ्यश्च बहूनि द्रव्याण्यंशुकानि च नवीनानि बहूनि वितीर्य सर्वेऽपि सममुत्थाय आलयाद् बहिर्भूताः सन्तः स्वं स्वं निवासस्थानं प्रपेदिरे।

तदनु विवेक्यतिविवेकिनामानौ विद्वत्कविकुञ्जरौ तावत्पर्यन्तमपि महीपालदर्शनाय अलब्धसमयौ दूयमानहृदयौ तदानीमपि भूपतिगृहद्वारमुपेत्य दौवारिकान् प्रत्याहतुः—'महाराजाय वक्तव्यम्' इति। तदनु तेषु मध्ये कश्चिद्दयालुरन्तर्गत्वा धैर्यान्महाराजसमीपं प्राप्य 'महाराजचक्रवर्तिन्[2]! महातेजस्कं पण्डितद्वयमेत्य द्वारि तिष्ठति' इति प्राह। महाराजोऽपि श्रुत्वा तद्वाक्यं ससंभ्रमं 'प्रवेशय तौ' इत्याज्ञापयामास। तदनु सोऽपि सत्वरमभ्येत्य महानुभावौ तौ अन्तः प्रावेशयत्। तावपि महापण्डितौ प्रविष्टावन्तर्गत्वा महाराजं सिंहासनस्थं पश्चाद्भृत्यधृतच्छत्रं पार्श्वयोरुभयोरङ्गनामणिवीजितचामरद्वयविराजन्तम्[3], **वेदाचलराजं** तं नयनपथातिथीचक्रतुः। अथाशीर्वादमुखेन फलोपहारं दत्त्वा स्तोतुमारेभाते—

'**वेदाचलेन्द्र** तव कीर्तिवधूः कथं वा
लोकात्मकान्यरमणान(?)[4] रमते सदाभीः।
प्रीतिश्च तादृशवधूपरि भूयसी ते
भूयाद्धि मोहविषयेषु न दोषबुद्धिः ॥ १९ ॥

(टि०) १. दीपज्वालायाः स्फूर्तिभिः; ता हि देवसन्निधौ संभवन्त्यः तत्प्रसादं सूचयन्तीति श्रद्धा। २. अन्यत्राप्येवं द्विरुक्तिः दृश्यते। ३. अत्र शत्रन्तेन समासो दुष्टः। ४. रमणा, रमणैः इति वा भवितव्यम्।

किंच—

कीर्तिस्त्रिया वारिधिलोकजालमुल्लङ्घितं देव हि लीलयास्ते ।
समुद्रकोणोत्तरणे प्रशस्तिर्हनूमतः सानवधिः कुतोऽभूत् ॥ २० ॥'

इति । तदनु महाराजः तच्छ्लोकद्वय श्रुत्वा सन्तुष्टमनाः ताभ्यामक्षरलक्षाणि प्रायच्छत् । तदनु तावपि कविकुञ्जरौ महाराजवितीर्णानि द्रव्याण्यमूल्यानि अम्बराण्याभरणानि च गृहीत्वा सन्तोषपरवशीकृतात्मानौ महाराजं बहुधानुगृहीत्वा(गृह्य) नृपतिना दत्तानुज्ञौ राजगृहात् प्रतिनिवृत्य स्वावासभूमिं प्रविष्टावास्ताम् । तदनु महाराजोऽपि सभासीनैः स्वविद्वद्भिस्साकं तावेव प्रचण्डपण्डितौ सशिरःकम्प बहुधा श्लाघयामास ।

तदनु महाराजश्चारमेकमाहूयाज्ञापयामास—'**श्रीरङ्गराजकालिङ्गराज**प्रभृतीनस्मत्सुहृदो महीपतीनयं सजग्धिकेलये[1] भवतः प्रार्थयतीत्युक्त्वा आगन्तव्यम्' इति । स च 'महाराजो यदाज्ञापयति तत्करोमि' इति गतः । महाराजो विस्मृतिमभिनीय चारान्तरमाहूयावोचत्—'नवीनौ पण्डितेन्द्रावागत्य वर्तेते हि; तौ वक्तव्यौ—"एतद्रात्रौ महासदो[2] भविष्यति, तदर्थं युवामागन्तव्याविति[3] महाराजः प्रार्थयति" इत्युक्त्वागन्तव्यमिति' । अयमपि 'तथैव करोमि' इति गतः । तदनु तेन तथैवाहूतास्ते सर्वेऽपि महीपतयः वेदाचलमहीपालगृहं प्रविष्टाः सन्तः तेन महाराजेन दत्तमन्नमिन्द्रादिप्रार्थनीयं भुक्त्वा अतिसन्तुष्टहृदयाः तेन महाराजेन स्वयमेव पुष्पचन्दनताम्बूलादिभिः सोपचारं सपूज्यमानाः नानाविधमुकुरनिकरविराजितमत्यन्तस्थूलमुक्तामणिचारुहारोपशोभितं विचित्रतरकुसुममालाजालालङ्कृतं, शुकपिकप्रमुखकान्तशकुन्तकलनिनादनादितं, द्वारभुवि

(टि०) १. सहभोजनप्रीत्यनुभवाय। २. सदो नाम तत्तद्विद्यानिष्णातपण्डितानां पाण्डित्यप्रकाशाय तत्समाननाय च संघटितं पण्डित-रसिक संमेलनम् । ३ अपप्रयोगोऽयम् ।

राजमानक्रीडार्थाहृतसिंहशार्दूलादिनानामृगवरोल्लासितं, ताराधिपाकारास्य-**वीरा-नारायणी**-प्रमुखवाराङ्गनासन्दोहविभ्राजित, महाराजेन सदःकरणाय पृथक्तया कारितं पटसदनतटं प्रति शनैः शनैरटन्तः तत्सदनमासाद्य महाराजेन साकं सदः कर्तुमारेभिरे । तदनन्तरमेतत्पण्डितद्वयमपि **गीर्वाणभाषया** [1]वर्णमेकम्, **आन्ध्रभाषया** [1]कीर्तनमेकं च परिकल्प्य तत्प्रकटीकरणाय सदःप्रदे-(वे?)शमतनोत् । तदनन्तरं राजानोऽपि सर्वे प्रत्युत्थानादिभिः सम्यक् संपूज्यात्म-सममेव तौ स्थापयामासुः । तावपि महाराजेन गन्धपुष्पताम्बूलादिभिः नितरां पूजितौ संगीतश्रवणनाट्यदर्शनाभ्यां परवशीकृतात्मानावभूताम् ।

वि०—'केयं सकलकलासारज्ञातिसुन्दरी रम्भेवास्ते ?'

अति०—(कर्णे) '**कालिङ्गमहाराजो** वर्तते हि; तन्नाटकशालामलं-कुर्वतीयं खलु । इयं हि—

नारायणी सा स्मरकेलिशूरा ताराधिपास्यामृतवाक्प्रचारा ।
वाराङ्गना गानकलातिवीरा धीरावगच्छेत्थमसावजारा ॥ २१ ॥'

वि०—'तस्य महाराजस्य नाटकशालासदृश्येवेयम् । अहो सखे, इयं का सौन्दर्यादिगुणै रम्भामपि धिक्करोति ?'

अति०—'**श्रीरङ्गनायक**महाराजनाटकशालालङ्कारभूतेयम् । इयं च—

मङ्गाभिधाना गणिकाग्रगण्या सङ्गीतशास्त्राभिनयातिपुण्या ।
रङ्गेशराजाविरतातिवर्ण्या शृङ्गारसपद्विपणिस्थपण्या ॥ २२ ॥'

वि०—'तर्हि तस्य महाराजस्य सस्कृतादिविद्यासारज्ञस्य **श्रीरङ्गनायक**-महीपालस्य सभाया एव सदृशीयम् । सखे, कस्येयं मानुषीरूपमास्थाय वर्तमाना रम्भैवेति भाति ?'

(टि०) १. वर्णं कीर्तनमुभे अपि कर्णाटसंगीतसंप्रदायप्रसिद्धौ गीत-प्रवन्धविशेषौ ।

अति०—'**देवनायक**महाराजनाटकशालीयेयमित्यवेहि । सखे, पश्य ; किं बहुना ?

रम्भा च नास्यास्सदृशी न चोर्वश्यन्याः समाः स्युर्न सुराङ्गनाश्च ।
इयं मृगाक्षी सकलान् सभास्थान् महीपतीन् मोहयति स्वगीतैः ॥२३॥'

वि०—'सखे, सत्यमेव महाराज**देवनायक**सभामलङ्कुर्यादेव । न सन्देहः । एतासु मध्ये इयमतीव राजते नक्षत्रेषु मध्ये चन्द्रमा इव ; केयम् ?

एतस्या गानमाधुर्यं देहसौन्दर्यमप्यलम् ।
अहो यौवनसौभाग्यं पश्यास्याः का भवेत् समा ॥ २४ ॥

तस्मादेतज्जिज्ञासा बलवती भवति । सखे, त्वरया ब्रूहि ।'

अति०—'इयं च **वेदाचल**महीपालो वर्तते हि सभामध्ये देदीप्यमानः, तदीया ।

यथास्तेऽयं सभामध्ये तथा चेयं महाद्युतिः ।
एतस्याः कास्ति लोकेऽत्र सदृशी वा जगत्त्रये ॥ २५ ॥

किं बहुना ?

का नाट्येऽस्याः समा भूयाद् गानाद्ये चास्ति का समा ।
मीनाक्ष्याश्चाङ्गसौभाग्ये **तानालापन**कर्मणि ॥ २६ ॥'

वि०—'सखे, नो चेदयं रसिकाग्रणीः कथं स्वीकुर्यात् । अहो सखे, अस्मदीयसाहित्यप्रकटनं कदा ? तूष्णीमेतत्प्रश्नोत्तराभ्यामेव कालो गच्छति[1] । महाराजाश्च सभां विहायोत्थिताश्चेत् किं कुर्वः ? अतस्तत्कार्यं त्वरयारब्धुमर्हसि ।'

अति०—'सर्वं भवतैव क्रियते, अनन्तरं बुद्धिमपि वक्तुमारभ्यते,[1] किं

(टि०) १. द्राविडसंभाषणशैलीमनुसृते एते द्वे अपि वाक्ये ।

वक्ष्यामि[1]' इति महामात्यं **राघवार्यं** प्रत्यब्रवीत्—'अहो **राघवार्य!** **श्रीचिदम्बरेश्वरविषये** साहित्यं परिकल्पितमास्ते, तत्सदसि प्रकटनीयम्। तस्मान्महाराजायेममर्थमुक्त्वा तदाज्ञाग्रहणपूर्वकभवदाज्ञापेक्षिता' इति। तदनन्तरं सोऽपि महाराजं गत्वार्थमिममकथयत्। महाराजश्च श्रुत्वा तद्वाक्यं 'अवश्यं तथास्तु' इत्यभ्युपेत्य स्वयमेव पण्डितेन्द्रौ दृष्ट्वा 'अहो पण्डितेन्द्रौ! भवत्साहित्यश्रवणादप्यधिकं किमस्माकमस्ति; अवश्यं प्रकटीक्रियतां; श्रोतुं सन्नद्धा एव भवामो वयम्' इति राज्ञा सोत्साहमाज्ञप्तौ पण्डितेन्द्रौ **वर्ण कीर्तनं** च गातुमुपचक्रमाते। तदनु महाराजास्सर्वेऽपि तद्गीयमान**वर्ण-कीर्तन**-श्रवणानन्दपरवशीकृतात्मानः तत्क्षणमेव असंख्याकानि द्रव्याण्यमूल्यान्यंशुकान्यनर्घ्या(र्घा)ण्याभरणानि च प्रत्येकं प्रत्येकं ददुः। तदनु महाराजः पण्डितेन्द्रोद्देशेन सदः प्रत्याह—

'क वा वेदबुद्धिः क वा शास्त्रबुद्धिः क वा काव्यबुद्धिः क वा गानधीः स्यात्।
क वाचारभक्तिर्ध्रुवं सर्वमेतद् ब्रुवन्त्वेतयोरित्यवन्त्वीदृशौ तौ ॥ २७ ॥'

तदनु सर्वेऽपि महीपालाः श्रुत्वा तद्वाक्यं स्वयमपि प्राहुः—

'एतयोस्तु समौ लोके ह्येतावेव न चेतरे।
विरुद्धानां समावेशश्चैकत्राश्चर्यदः खलु ॥ २८ ॥'

इति सर्वैरपि राजशिखामणिभिरतितरामुपलालितौ श्रीपण्डितेन्द्रौ तद्राजसमुदायदत्तद्रव्यादिवस्तुजातं गृहीत्वा 'गन्तुमुष्ट्रशतं गजशतं चापेक्षितम्, एतद्द्वयालाभे वाजिसहस्रापेक्षा च स्यात्, महाराजैर्भवद्भिरावयोः महाराजी*कृतत्वात्। अतः प्रार्थितं सर्वं देयम्' इति महाराजं प्रत्यूचतुः। महाराजोऽपि तत्सर्वं द्विगुणितमेव ददौ।

(टि०) १. अवन्तु-ईदृशौ पण्डितौ भवन्तोऽत्र सन्निहिताः प्रभवः रक्षन्तु।

---

* MS. जै.

अथ तौ श्रीपण्डितेन्द्रौ विवेक्यतिविवेकिनौ ।
महाराजाभ्यनुज्ञां च गृहीत्वा प्रस्थितौ तदा ॥ २९ ॥

तदनु तौ तद्दत्तद्रव्यादिवस्तुजातमुष्ट्रगजेषु समारोप्य[1] गच्छन्तौ सन्तौ स्वावासस्थानमुपेत्य उष्ट्रगजेभ्योऽवरोप्य गृहान्तर्निहितान्यनर्घाणि तद्वस्तूनि मुहुर्मुहुः पश्यन्तावानन्दाब्धिमग्नौ सदानुद्विग्नौ बभूवतुः ।

तदनु महोत्सवकाले भगवद्दर्शनार्थं सजग्ध्यादिकेल्यर्थं च स्निग्धेन **वेदाचल**महीपालेन बहुधाह्वाने कृते तन्मैत्रीपरतन्त्रतया समागतेषु महीपालेषु मध्ये **देवनायक**महीपालः **कालिङ्ग**महाराज-**श्रीरङ्गनायक**महाराज-**वेदाचल**-महीपालप्रभृतीन् सर्वानपि **मार्गमध्ये वर्तमानायां तुङ्गपुर्यां**[2] दिनमेकमुषित्वा **भगवतोऽगस्त्येश्वरस्य** दर्शनमपि कृत्वा गच्छन्तु भवन्त इति बहुधा प्रार्थयामास । ततस्ते सर्वेऽपि महीपालाः तत्प्रार्थनामपरिहार्यां मत्वा 'तथैव कुर्मः' इत्यङ्गीकारवार्तां प्रसङ्गीकुर्वन्तः सङ्गीतरसिकाः कुरङ्गीदृशस्ताः पुरतः प्रस्थाप्य पश्चात्स्वस्वपरिवारैः साकं वेलोल्लङ्घनमाचरन्त उदन्वन्त इव **कलशपुरीं** तां विहाय **तुङ्गपुरीं** प्रति प्रतस्थिरे ।

इति पञ्चमाश्वासः ।

[अथ षष्ठाश्वासः]

प्रस्थितेषु महीपेषु तदानी सा पुरी बभौ ।
निर्मुक्तभोगभुजगत्वगिवाखिलपश्यताम्[3] ॥ १ ॥

(टि०) १. अत्र कोशे दृश्यमानः समारोपयित्वेत्यपपाठः लेखकप्रमादजः। २. तुङ्गपुरी तुङ्गम्पाकमिति अद्य चेन्नपुर्यन्तर्भूतः प्रदेशः। ३. अखिलानां पश्यतां जनानामित्यर्थः। प्रामादिकः समासः।

अथ तत्पण्डितेन्द्रौ च राजमार्गानुयायिनौ ।
तामेव तुङ्गनगरीं राजवद्गन्तुमुद्यतौ ॥ २ ॥

अथ तयोर्गच्छतोर्विवेक्यतिविवेकिनमाह—'पश्य,

कुम्भीन्द्रोपरिविद्यमानपुरुषप्रोत्तुङ्गबाहुस्फुर-
द्दण्डप्रोद्धतदुन्दुभिध्वनिघनैः सेनासमूहारवैः ।
पातालं गगनं समस्तमपि च *ब्रह्माण्डमेवाधुना
भिन्दाना इव भान्ति कान्तिमधुराः सर्वेऽपि भूपाः सखे ॥ ३ ॥'

इति ।

तदनु एतावति(पि) पण्डितेन्द्रौ राजदत्तैः स्वपरिवारैः साकमपराविव राजानौ गच्छन्तौ तमेव सेनासमूह दृष्ट्वा विस्मयं भजन्तौ तत्पश्चात्समीप एवानुव्रजन्तौ तेषु महाराजेषु स्वपूर्वागतदेवनायकमहीपालाज्ञाकरणधुरन्धरसेवकधुरीणपरिष्कृतायां ध्वजतोरणपताकालङ्कृतायां श्रीमत्तुङ्गपुर्यां प्रविष्टेषु सत्सु, तामेव पुरीमनुप्राविशताम् ।

अथ तौ देवराजस्य[१] सेवकेन प्रदर्शिते ।
गृहे प्रविश्य सर्वज्ञौ सुखेनातिष्ठतां तदा ॥ ४ ॥

तदनु तौ 'मार्गश्रमापनोदनाय द्वित्रि(त्र)घटिकापर्यन्तं निद्रासुखमनुभवावः' इत्युभावपि परस्परमालोच्य स्वभृत्यविस्तारितयोः तल्पवरयोः शयनमाचरन्तौ 'पाकादिकर्मणि संपूर्णे सति प्रतिबोधनं कुर्वन्तु' इति स्वभृत्यानाज्ञापयन्तौ तदानीमेव हठादागतां

(टि०) १. देवनायकस्य ।

---

* MS Here the writing on the reverse of leaf number 29 stops with a single line; the rest of the leaf is blank and without any break, the writing is continued on leaf 30*a* in a new hand.

गाढनिद्रामनुभवन्तौ पाकादिकर्मण्युपरते च अविशदन्यूनाधिकभाववद्भिः विद्यार्थिसद्भिः[1] सभयमेव प्रतिबोध्यमानौ उत्थायोत्थाय पुनः पुनः निद्रामेवाचरन्तौ कथंचित्प्रतिबोधमाजग्मतुः ।

अथ तौ स्नातुमिच्छन्तौ सरः प्रापतुरुज्ज्वलम् ।
कमलैर्विमलैस्तोयैरगस्त्येशस्य सन्निधौ ॥ ५ ॥

अति०—'सखे विवेकिन्! सरोवरस्या(स्य) माहात्म्यं किं वक्ष्यामि? तथा हि—

सरो वरं करोति मे परं सुखं सुरेट्कृतं[2]
निराकृतावरातपातुरातिकातरार्तिकम्[3] ।
मुरारिहृत्सरोजभूचरोज्ज्वलन्मरालराट्[4]
परापरस्वरात्मको [5]गराशनश्चरेदिह ॥ ६ ॥

इति सरोवरदर्शनजानन्दभरितौ दुरितध्वंसननिपुणमेतज्जलकणं[6]मेकमेवाङ्गपतितं भवेदिति स्नानतश्च पुरुषार्थचतुष्टयमपि करस्थमेव स्यादिति दृढ मन्वानौ सादरं स्नात्वा माध्यन्दिननियममपि सर्वं निर्वर्त्य भगवतो देवदेवस्य **अगस्त्येश्वरस्य** दर्शनाय तदालयाभिमुखमेव गच्छन्तौ मध्येमार्गं **मिश्रादिभिः** स्वविद्वद्भिः अन्यैश्च बहुपरिजनैः साकं **श्रीमदगस्त्येश्वर**दर्शनार्थमेव समित्रमागच्छन्तं **देवनायक**महाराजमपश्यताम् । स महाराजोऽपि—

(टि०) १. विद्यार्थिभिः सद्भिश्च । अत्र पाठस्तु न तृप्तिमावहति । २. देवनायकनिर्मितमित्यर्थः; देवेन्द्रेण श्लेषः प्रभौ आदरातिशयप्रयुक्तः । ३. निराकृता अवरेण निकृष्टेन आतपेन आतुराणामतिकातराणामार्तिः येन तत् । ४. मुरारीत्यादि मरालराडित्यन्तं शिवस्य विशेषणम्; विष्णुहृदयकमलविहारिहंसोत्तम इत्यर्थः । परापरस्वरात्मकः प्रणवरूपी । ५. गराशनो विषाशनः शिवः । ६. कण इति पुंलिङ्गेन भाव्यम् ।

दृष्ट्वा तौ पण्डितश्रेष्ठौ साष्टाङ्गमकरोन्नतिम् ।
युष्मादृशस्तु विद्वांसः सन्ति क्वेति स्तुवन्निमौ ॥ ७ ॥

तदनु स **देवनायकः** ताभ्यां पण्डिताभ्यां सह* तदालयं प्रविश्य नमस्कार-सहस्रपूर्वकप्रदक्षिणसहस्रं च कृत्वा भगवतो देवदेवस्य **अगस्त्येश्वरस्य** सन्निधि-मुपेत्य सुखप्रार्थनामकरोत् । तथाहि—

'क्षोणी यस्य शताङ्गतामभिययौ यस्याद्रिराजः परं
कोदण्डत्वमुवाप तस्य गुणतां यस्य द्विजिह्वाग्रणीः ।
†बाणत्वं च बभार यस्य मुरजिद् ब्रह्माप्यभूत्सारथिः
सोऽयं चन्द्रशिखामणिः सुखमलं दद्याद**गस्त्येश्वरः**[1] ॥ ८ ॥'

इति भगवद्दर्शनं सभक्तिश्रद्धं कुर्वन् प्रदक्षिणतः भगवत्य**खिलाण्डेश्वरी**सन्निधि-मुपेत्य तामपि स्तोतुमारेभे—

'**अखिलाण्डेश्वरि** दयया मखवानभवं भवानि सकृ‡दनया ।
उपरि च धावति चित्तं प्रपदजसरिदादिदेवपदलाभे[2] ॥ ९ ॥'

इति । स्वस्तुतिप्रसन्नया भगवत्या सम्यगनुगृहीतः ध्वजस्तम्भप्रान्तप्रदेशमवाप्य सर्वैस्साकं मन्त्रजपं कुर्वाणः प्रसङ्गात् समारब्धशास्त्रप्रसङ्गयोः पदे पदे प्रार्थित-

(टि०) १. अत्र शिवस्य त्रिपुरसंहारित्वेन स्तुतिः । २. अत्रायं भावः—स्तोतुः देवनायक इति नाम्नः कारणात् श्लेषेण देव्या दयया स मखवान् देवेन्द्रोऽहं जात इति वर्णयित्वा उपरितनपदप्रेप्सुराह—प्रपदजसरि-दादिदेवपदलाभ इति । प्रपदजसरित् चरणप्रवृत्तगङ्गाप्रवाहः विष्णुः, तदादि-देवपदलाभ इति ।

---

* MS. स † MS. पाणत्वं. ‡ MS सकु or सतु

परस्परभङ्गयोः **मिश्रपण्डितेन्द्रयोः** प्रसङ्गकलहं दृष्ट्वा 'अहो **मिश्रपण्डितेन्द्रौ,** नेदानीमस्यावकाशः; रात्रौ सदः करिष्यामि; तदा प्रसङ्गो भवतु' इति समाधाय ताभ्यां सहैव आलयाद्बहिरेत्य सर्वाननुज्ञाप्य स्वभवनं प्रविष्टः, चारमेकमाहूय 'अहो राजानः, सर्वेऽप्यत्रैव भोक्तुमागन्तव्याः[1], इति युष्मान् प्रार्थयतीत्युक्त्वा आगन्तव्यम्' इति तमाज्ञापयामास। सोऽपि गत्वा महाराजानेवंरीत्याब्रवीत्। तेऽपि तद्वाक्य श्रुत्वा तथैवाकुर्वन्। तदनु स महाराजोऽपि सर्वानपि महाराजान् गृहीत्वा **पद्मसरसि** सहागताभिर्वारवनिताभिस्साकं जलक्रीडां कर्तुं तदेव सरः प्रविवेश।

तदनु पण्डितेन्द्रावपि शिवपूजादिकं विधाय क्षणमात्रं विश्रम्योत्थितौ पटसद्मनगरीदर्शनाय बहिर्निर्जग्मतुः। विवेकी पुरतो वर्तमानं गोपुरं दृष्ट्वा साश्चर्यो बभूव। अतिविवेकी तथाश्चर्यवन्तं विवेकिनं प्रत्याह—

'एतद्गोपुरमस्तु मस्तकलसद्धेमाद्रिधामोज्ज्वल-
त्कुम्भोत्तम्भितजम्भभेदिनगरं शम्भोरगस्त्येशितुः।
आश्चर्यं किमहो सुरेशहृदयाब्जाराधिताङ्घ्रेर्महा-
देवस्यास्य च वस्तु किं विरहसंबन्धीह तिष्ठेत्सखे[2] ॥ १० ॥

किंच—

[3]भावालयोऽयं खलु देवराजा[4] सेवारतेनोज्ज्वलहेमरूपः।
शैवेन चाकारि महेश्वरस्य को वा सुरेन्द्रस्य भवेदशक्यः ॥ ११ ॥'

इति।

(टि०) १. अपप्रयोगोऽयम्। २. अगस्त्येश्वरसंबन्धि सर्वं देवेन्द्रविरहासहिष्णु; अतश्च तदालयगोपुरमपि देवेन्द्रलोकस्पर्शिशिखरः। अत्र सर्वत्र देवनायकदेवेन्द्रयोः श्लेषः। ३. भक्तिमयोऽयमालय इत्यर्थः। ४. तृतीयान्तोऽयं शब्दः।

वि०—'हे सखे! तिष्ठत्विदम्; पटसद्मनगरीमत्याश्चर्यकरीमेव पश्यावः' इत्युभावपि किंचिद् दूरं गत्वा पुरतो दृश्यमानां तामुद्दिश्य अतिविवेक्याह—

'पटगृ(ह)घटितं पुरं सुरेन्द्रः[1] स्फुटतरमेव चकार पश्य धीमन्।
कुटवरनिकटाध्ववृक्षराजत्तटपरिशोभितपद्मिनीसमेतम्॥ १२॥'

इति। विवेकी तामेव पद्मिनीं दृष्ट्वा अतिविवेकिनमाह—

'भूभृद्वराः सपदि पश्य सरस्यमुष्मिन्
श्रीदेवनायकमुखाः सह कामिनीभिः।
रूपातिरेकजितदेववधूभिरेते
कुर्वन्ति पद्मनिकरैर्लसितेन्दुलीलाम्[2]॥ १३॥'

इति।

वि०—'ततः सन्तोष एवावयोः; अवकाशो महानस्ति; पटसद्मनगरीं सम्यक् पश्यावः' इति किंचिद् दूरं गत्वा पटसद्म चैकं पश्यन्नाह—

'राजद्रक्तपटैकनिर्मितमिदं सद्मोत्तमं दृश्यते
कस्येदं वद मित्रसत्तम मनोवागिन्द्रियागोचरम्।
मास्तु त्वत्कथनं **कलिङ्गनृपतेर्ज्ञातं मरालोत्तम-**
भ्राजत्**केतन**नूतनाम्बरवरालोकेन तस्येत्यलम्॥ १४॥'

इति।

अति०—'सखे! किं ते वक्ष्यामि बुद्धिविशेषम्, येनानुक्तमपीदं गृहीतं त्वया।'

१. सुरेन्द्र इत्यनेन देवनायक एवाभिप्रेतः। सरो निकषा पटमण्डपघटितमावासस्थानं वर्ण्यमानदेवनायकेन निर्मितम्। २. स्वय पद्मनिकरसमानाः नायकाः चन्द्रोपमाभिर्नायिकाभिर्जले मिलिताः अपूर्वं पद्मचन्द्रयोगमिव प्रदर्शयन्ति।

वि०—'आस्तां परिहासः। इदमप्यनुक्तं गृह्यते द्रष्टव्यम्। तथाहि—

पार्श्वे तस्य महोन्नतं पतगराड्राजत्पटालङ्कृतं
प्रोत्तुङ्गध्वजदण्डमण्डितमिदं शाटीगृहं लक्ष्यते।
तच्च ज्ञाततरं भवत्यतितरां श्रीरङ्गराजीयमि-
त्यत्यन्तामलकोमलाम्बरवरारब्ध सखे न श्रमः॥ १५॥'

अति०—'पूर्वमेवोक्त खलु अतितीक्ष्णा ते बुद्धिरिति।'

वि०—'सखे! पदे पदे परिहससि। तिष्ठतु तावत्; इदमपि मयैव ज्ञातं भवति। तथाहि—

अन्यन्नीलपटैककल्पितमिदं तस्यैव पार्श्वान्तरे
कस्येदं सुहृदुत्तमैतदपि मे ज्ञातं न चेह श्रमः।
श्रीमद्वेदगिरिक्षितीन्द्रमणिसंबन्धीति सम्यक्तया
त्वङ्गत्पुङ्गवकेतुयष्टिविषयालोकात्पटीमण्डपम्॥ १६॥'

अति०—'सखे! सत्यं तस्यैव महाराजस्येदम्।'

वि०—'सखे! पदे पदे परिहससि खलु; तद्युक्तमेव। तथाहि—

'संख्याविहीनेषु पटीगृहेषु द्वयोस्त्रयाणां धिषणा तथा मे।
शास्त्रेषु भूयस्सु समुद्रभूतेष्वेकस्य वाक्यस्य मतिर्यथा स्यात्॥१७॥'

अति०—'सखे! न केवलं भवतस्तथा। सर्वेषामपीति बोद्धव्या। असंख्येयपदार्थेषु कस्य वा संख्याज्ञानं लक्षणज्ञानं वा स्यात्, येन तत्तदीयमिति बुद्धिर्भवेत्? अस्तु वा कथंचित् तत्तदीयमिति बुद्धिः, किं तेन प्रयासेन? तस्मादस्मदीयकार्यदर्शनार्थे[1] त्वरया गच्छावः। महाराजाश्च जलक्रीडां विधाय

१. कार्यदर्शनमिति द्राविडोक्त्यनुकरणम्।

षड्रसोपेतमनेकशाकादिसहितमिन्द्रादिप्रार्थनीयमन्नं च भुक्त्वा धृतगन्धपुष्प-ताम्बूलाः सन्तः तेनैव देवनायकेन सदःकरणाय पृथक्तया निर्मिते पटमण्डपोत्तमे सदः कर्तुमुद्युक्तास्तिष्ठेयुः । ततः तूष्णीं पटगृहनगरीं वर्णयन्तौ स्थितौ स्वश्चेत् कथं कार्यं फलितं स्यात्?' इति ससंभ्रमं गृहमुपेत्य सायंसन्ध्यावन्दनपूर्वकं भुक्तिं विधाय महाराजसभां गन्तुमुद्युक्तावास्ताम् । तदनु,

वि०—'सखे! महाराजसदःप्रवेशे सति **मिश्रस्य** आवयोश्च प्रसङ्गश्चलेत् । तथा सति भगवद्विषये परिकल्पितस्य **संस्कृतकीर्तनस्य** च **आन्ध्रकीर्तनस्य** च प्रकटनं कथं भविष्यति?' इति ।

अति०—'सखे! विना मध्यस्थान् प्रसङ्गः कथं चरिष्यति? ततः साहित्यप्रकटनस्य अवकाशः स्यादेव महान्' इति ।

वि०—'सखे! विना मध्यस्थानिति कथमुक्तम्? तेनैव देवनायकेन स्वनिकटवृत्ति(वर्ति)**शेषाद्रिशास्त्रि**मुखेन मध्यस्थीकृताः ते सर्वेऽप्यसत्परि-भवे कृतसङ्केताश्च तिष्ठन्ति खलु । तत् किं न बुद्धं भवता?' इति ।

अति०—'तर्हि अवमानः स्यादेव; न सन्देहः । तदद्य किं प्रतिविधात-व्यम्? ईश्वरमेव प्रार्थयामि' इति तत्प्रार्थनामकरोत् । तथाहि—

'**अगस्त्याधिनाथो** गभस्त्या गभीरः
प्रशस्त्या महत्या वृतस्त्यागशै(शी)लः ।
स कुर्याच्छुभं नः स्व(स्त्व)मर्यादभूमा
सपर्याप्रसन्नः प्रपर्याप्तचेताः ॥ १८ ॥

इदं देव धन्यं कथं स्व.जन्यं(?)
गृहीताद्रिकन्यं महिम्न्यत्य(प्य?)नन्यम् ।

[१]न कुर्याच्छुभानि* प्रकृष्टं बहूनि
प्रपञ्चाधिकानि प्रगल्भस्थितीनि ॥ १८ ॥

धराभृत्कुमारीपरानन्दहेतो
निरालम्ब एवास्म्यरात्यब्धिमग्नः ।
करालम्बमद्यादराद्देहि शम्भो
पुरा(रा)तिता सा परा दर्शनीया ॥ १९ ॥

क्व वा यामि शम्भो दिवा दूक्तभीत्या (शम्भोऽद्य वाद्युक्तभीत्या[२] ?)
भवानेव साक्षी ब्रवीम्यद्य किं वा ।
शिवाज्ञा बलीयस्यवाज्ञानिनं मां[३]
तवाज्ञातमेतद् भवाज्ञापकः किम्[४] ॥ २० ॥

शरण्यस्त्वमीशास्यरण्ये गतोऽहं[५]
तरण्यब्जदृक्[६] सत्सरण्या श्रुतो(श्रितो)(ऽहम् ?)† ।[७]
हिरण्यप्रदस्सद्वरेण्याद्य भूया
धरण्यां यथा‡ स्युस्तरुण्यादयो मे ॥ २१ ॥

(टि०) १. न कुर्यादित्यस्य कथमित्यनेनान्वयः । २. 'वाद्युक्तभीत्या' इति शोधनमपेक्षितम्; मातृकास्थस्त्वपपाठः । मिश्रादिवादिभ्यो भविष्यद्-दुरुक्तिभीत्या अद्य क्व वा यामीत्यन्वयः । ३. अव अज्ञानिनं मामिति छेदः । ४. किमिति, तवाज्ञातं किमित्यन्वयः । आज्ञापको भव । ५. अरण्ये गतोऽहं, गतिमूढो जातोऽहमिति भावः । ६. भगवत्सबोधनमिदम्; अब्जश्चन्द्रः; सूर्यचन्द्रनयनेति यावत् । ७. सत्सरण्या सत्पथेन त्वामाश्रितोऽहम्; अथवा सत्सरणि सन्मार्गमाश्रितोऽहम् ।

---

* MS छुहानि

† MS. One letter missing.

‡ Two leaves from this word onwards in the older hand.

[1]अयं देवराजः सदा भक्तिभाजः
कदा वास्यतेजःप्रधूताम्बुजौजाः ।
दिनं व्यर्थमेवास्त्यनन्तार्चिताङ्घ्रि-
र्धनं वाद्य दद्याद् गनं(घनं)वा स्वबोधम् ॥ २२ ॥

कलानाथचूडानलार्केन्दुदृष्टे
बलादेव मां पाह्यलाभातिदीनम् ।
मलावासभूमिं[2] सुलालित्यशालिन्
कुलाद्रीन्द्रकन्याविलासैकहेतो ॥ २३ ॥

पल(श)ान्तकारिन्[3] तुलाहीन शम्भो फलाकाङ्क्षया त्वां किलाहं भजामि।
ललाटाक्ष कस्माच्चलापाङ्ग एवास्यलापोद्यमास्यस्सुलापश्च[4] भूयाः ॥ २४ ॥'

वि०—'सखे! भगवत्यगस्त्येश्वरे अष्टकमेकं कृतं खलु। तदद्य भगवान् **अगस्त्येश्वरः** प्रार्थनां कुतो न सार्थकीकुर्यात्। किंच—

(टि०) १. अत्र देवराजः देवनायकप्रभुः, अगस्त्येश्वरनामा महादेवश्च। उभयोरपि श्लेषेण प्रवृत्तोऽय श्लोकः। भक्तिभाज इति षष्ठी; भक्तिं कुर्वतो मादृशस्य। आस्यतेजःप्रधूताम्बुजौजाः इति देवनायकस्य वा शिवस्य वा विशेषणम्; अम्बुजं पद्मम् अम्बुजः चन्द्रः तत्परिभाविमुखकान्तिः। अनन्तार्चिताङ्घ्रिरिति उभयविशेषणम्। 'दिनं व्यर्थमेवास्ति' इति स्वदशा-दैन्यप्रकटनम्। द्वितीयपादस्थ 'कदा' शब्दस्य चतुर्थपादेन अन्वयः २. मला-वासभूमिमिति स्वदारिद्र्यप्रकाशकमिदं विशेषणं मामिति पूर्वपादस्थपदेन अन्वेति। ३. पलाशाः पिशिताशा राक्षसाः, तदन्तकारिन्। ४. अला-पोद्यमास्यः। न विद्यते लापे भाषणे उद्यमो यस्य आस्यस्य सः; अभाषमाण इत्यर्थः। सुलापो भूयाः मया सहालप।

अगस्त्येशाष्टकं पुण्यं यः पठेत्सततं नरः ।
सर्वपापैर्विमुक्तः सन् सर्वान् कामानवाप्नुयात् ॥ २५ ॥

ततो विना संशयमावयोर्जय एव भवेत् । तस्मात्त्वरया सभां प्रविशावः ।'

इति त्वरया गत्वा सभां प्रविश्यागच्छन्तौ पण्डितेन्द्रौ दृष्ट्वा राजानः सर्वेऽपि प्रत्युत्थानाद्युपचारं कृत्वा स्वसममेव स्थापयामासुः । तदनु पण्डितेन्द्रौ पूर्वं स्वाकृताशीर्वादं[1] देवनायकमहीपालं प्रति [2]बहिर्लापिश्लोकात्मकमाशीर्वादं[1] चक्रतुः । तथाहि—

'राजा कुत्र तु पूज्यते द्विजगणैः, स्वर्गाय किं कल्प्यते,
को वा पाणितले हरस्य, किमहो पद्माभमास्ते भुवि ।
आरुह्याद्य गतागतं कमिह वा कुर्वन्ति **हूणादयः**,
प्रश्नस्योत्तरमध्यवर्णघटितो जीयात्स भूदेवराट् ॥ २६ ॥'

पण्डितेन्द्राशीर्वादसन्तुष्टहृदयः तदुपरिसञ्जातभूरिदयोदयः स **देवनायक**महीपालः **शेषाद्रिशास्त्रि**प्रभृतीननेकान् विदुषः मध्यस्थान् कृत्वा **मिश्रपण्डितेन्द्रयोः** प्रसङ्गं कारयामास । मिश्रपण्डितेन्द्रयोः समबलयोर्वाग्घोरणिं दृष्ट्वा सन्तुष्टहृदयो महाराजस्तयोरितरेषां च बहुमानं वाचामगोचरमकरोत् । तदनन्तरं भगवद्विषये

(टि०) १. उभयत्रात्राशीर्वादशब्दप्रयोगः पुनरुक्तिदुष्टः; द्वितीयः प्रमादजः स्यात् । २. बहिर्लापीति चित्रकाव्यप्रभेदः यत्र दत्तानां प्रश्नानामुत्तरभूतेभ्यः पदेभ्यः अक्षरशो भागशो वाभिप्रेतं पदं लभ्यते । अत्र पद्ये पञ्च प्रश्नाः तेषां क्रमश उत्तरभूतानि पदानि (१) स्वदेशः; "स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते" इति न्यायमनुसृत्येदमुक्तम्; (२) सवनम्; (३) पिनाको नाम धनुः; (४) नयनम्; (५) शकटम् । एषां मध्यवर्णघटनेन लब्धं प्रभोर्नाम देवनायक इति ।

पण्डितेन्द्रपरिकल्पितं **संस्कृतान्ध्रसाहित्यं** श्रुत्वा ताभ्यां बह्वदात्। तदनु तत्सर्वं गृहीत्वा सन्तोषपारवश्यं गतौ तौ राजानुज्ञां गृहीत्वा स्वनिवासगृहमुपेत्य शिवपूजादिकं सर्वं विधाय स्मृतभार्यापुत्रादिकौ सन्तौ संप्राप्तस्वकीयमन्दिरवरं **चेन्नपुरं** गन्तुकामौ राजदत्तैस्तत्तद्विभवैः सह देवौ राजानाविव पुरान्निर्जग्मतुः।

ततस्ते सर्वेऽपि राजानः **देवनायकेन** एतद्दिनमपि अत्रैव वस्तव्यं भवद्भिरिति बहुधा प्रार्थिता अपि स्वस्वकार्यभरानङ्गीकृततद्वार्ताः कोटिमार्ताण्ड-प्रकाशाः धूर्तावलिमदभञ्जनसाशाः [1]मूर्तानेकमदनबुद्धिदाश्वेशाः श्रीमता **कालिङ्ग-**महाराजेनागामिनि सोमवासरे मदीयोपवनपर्यन्तम् . . . . *

[अत्र ग्रन्थपातः]

ततस्तेषु गतेष्वेव **वेङ्कटाद्रि**महीपतिः।
[2]**रङ्गराजा** समं द्रष्टुं **रङ्गराज**मियेष सः॥ २७॥

तदनु,

तत्कालाहतदुन्दुभिप्रभवदुर्वारावर्†भतिसं-(?)
भीताशेषदिशावशापतिकृतप्रोत्तुन्त(ङ्ग)फीट्कारतः।

(टि०) १. एककं मूर्तिमान् अनङ्गोऽयमिति बुद्धिं जनयन्तः। २. रङ्गराजा रङ्गराजनामकप्रभुणा सह। रङ्गराजं तिरुनीर्मलै इति ख्याते चेन्नपुरीनिकटवर्तिनि क्षेत्रे कृतालयं देवं श्रीरङ्गनाथम्। ३. वशा गजवधूः; दिशावशापतिः दिग्गजः।

* There is a gap in the MS here The handwriting changes here and continuous numbering of the leaves has been made. The hand is bad

† This portion may be reconstructed as दुर्वाराराव.

शेषः शोषितवागभूत् सुरपतिर्घोषं वितेने भयाद्
रोषं चक्रुरलं महेश(श्व)र इति द्वेषात्सुरारातयः* ॥ २८ ॥

एवम्,

काहल्यादिषु वाद्येषु वादितेषु सुवादकैः ।
प्रस्थितौ भूपती चेमौ **रङ्गराड् वेंकटाद्रिराट्** ॥ २९ ॥

ततस्तौ पण्डितेन्द्रौ च तयोः प्रस्थानसंभ्रमम् ।
दिदृक्षू जातसन्तोषौ जागरूकावपश्यताम् ॥ ३० ॥

'†सखे! अत्याश्चर्यकरं सर्वमेतत्पश्य—

ध्वजद्वयोद्भासितकुम्भिराजद्वयं पुरो गच्छति पश्य धीमन् ।
[1]**रङ्गेश**सन्दर्शनलुब्धचेतःकुलाचलद्वन्द्वमिवाधिकाभम् ॥ ३१ ॥

तत्पश्चादेव कल्पितयूथा योधाः समापतन्ति प(श्य?) सम्यगतिभयङ्कराकारा वीराः ।
तथाहि—

गाधावशेषीकृतशत्रुबाधाः प्राधान्यतः कल्पितयुद्धमेधाः ।
योधाः कृतक्ष्मारमणानुरोधाः साधारणा यान्ति सखे सनाथाः ॥३२॥

किंच तत्पश्चादतिशूराः तुरङ्ग(म)‡वाराः[2] गच्छन्ति । तथाहि—

तुरङ्गिणो बाणसमृद्धतूणाः पाणिस्फुरत्तीक्ष्णमहाकृपाणाः ।
पश्येदृशो युद्धकलाप्रवीणाः प्रयान्ति रोषेण मुखेऽतिशोणाः ॥ ३३ ॥

(टि०) १. तोयाद्रिदेवालयस्थो रङ्गनाथः । २. तुरङ्गमवारा अश्वारोहाः ।

---

* The line is scored through here and the reading written underneath in a minute hand

† The right-hand end of this leaf is broken slightly.

‡ At the broken right-hand end, there seems to be space for one letter, hence म is suggested.

तत्पश्चादायान्तं **श्रीवेङ्कटाचल**महीपालं **श्रीरङ्गनायक**भूपालं च दृष्ट्वा सानन्दाश्चर्यमतिविवेकिनं प्राह विवेकी—

'**श्रीमद्वेङ्कटकृष्ण**नामसहजोदारं गभीरं महा-
धीरं **वेङ्कटशैल**नामजगतीदारं कुबेरं धने ।
मारं शूरसुवारणाधिपलसद्धौदान्तरासीनमा-
कारेणाधिक**मन्त्रिभावविलसत्कोदण्डरामो**ज्ज्वलम् ॥ ३४ ॥

सखे! पश्य' इति । 'एवम्,

नानारत्नविराजमानकनकोद्दामोरुहौदोपरि-
भ्राजद्धोजसमान**रङ्ग**नृपतिं नित्यान्नदं पश्य रे ।
पार्श्वे तस्य च विद्यमानमतुलं **श्रीमुद्दुकृष्णा**भिधं
पाकल्भूमिपतिं सभापतिमहीपालं च पार्श्वान्तरे ॥३५॥'

अति०—'सखे! किं बहुना ?

रङ्गनायकभूपस्य तुल्यः को वास्ति भूतले ।
गुणे नृभरणे वापि धने योगे [१]घनेऽपि वा ॥ ३६ ॥'

वि०—तद्वाक्यं श्रुत्वा, 'सखे! किं विरुद्धमुच्यते ? तथाहि—

एतत्तुल्यतया पूर्वं राजानस्ते प्रकीर्तिताः ।
इदानीं तस्य तुल्यश्च कोऽपि नास्तीति कथ्यते ॥ ३७ ॥

(टि०) १. संस्कृतघनशब्दः लक्षणया द्राविडभाषासु गौरववाचकतया प्रभूणां राज्ञां च विशेषणत्वेन प्रयुज्यते । गीतिषु प्रशस्तिषु लोकव्यवहारे च भूयानस्यैवं प्रयोगः ।

ततो जानाम्यहं सर्वं वेदशास्त्रादि . सखे* ।
पूर्वोत्तरविरुद्धं त्वद्वाक्यं वर्तत इत्यलम् ॥ ३८ ॥

आस्तामेष प्रकारोऽपि वेदादिवासनां गतः ।
तत्तुल्यः कोऽपि नास्तीति शपथः क्रियते मया ॥ ३९ ॥

तथैवास्तु विरोधोऽतः कोऽपि नास्तीति गृह्यताम् ।
तुल्यत्वेनाभियुक्तानां राज्ञामस्याभिदा यतः ॥ ४० ॥'

वि०—'पुनश्च शास्त्रवासनामवलम्ब्यैवोच्यते भवता ।

आस्तामिदम्; अयमागच्छति पश्य; महाविद्वानयं हि—

शेषाद्रिविद्वान् बहुभूषणाढ्यस्तोषाद्गजेन्द्रोपरि घोषयुक्तः ।
भाषादरश्चात्तविशेषविद्यः पूषेव चास्ते खलु चैष कान्त्या ॥ ४१ ॥'

वि०—'अयं कः अतिविस्तृतोष्णीषधारी सर्वाभरणभूषितः गजराजमारुह्यागच्छति?'

अति०—'अयं हि—

वेङ्कट्रायाभिधः[1] श्रीमान् कङ्कणाद्यैरलंकृतः ।
गजराजं समारुह्य व्रजत्यद्भुत**गातृराट्**[2] ॥ ४२ ॥

(टि०) १. वेङ्कट्राय इति वेङ्कटरायशब्दस्य लौकिकमपभ्रष्टं रूपम् । २. गायकोत्तमः ।

---

* MS Three letters scribbled over here, सखे can be made out, the previous letter is illegible.

[1]भार्गवोऽपि कविताधिकशूरस्तार्किकेन्द्रमुकुटोज्ज्वलहीरः ।
एष याति गजराजविराजद्रलहेममयपीठवरस्थः ॥ ४३ ॥'

वि०—'सखे! अयं कस्य सूरिः?'

अति—'न प्रष्टव्यम्; तथाभिन्नयोस्तयोः[2] कस्य सूरिश्चेत् किम्? तथापि **श्रीवेङ्कटाचल**महीपालाभिमानो महानस्योपरि।'

वि०—'सकलविद्याप्रवीणे कस्य वा प्रीतिर्न स्याद्रसिकस्य!'

अति०—'सत्यम्। सखे! अयं च महानिपुणो गच्छति पश्य गजराजमारुह्य,

श्रीशुण्ठिसुब्बात्मजगायकेन्द्रः स्वकीयगानाङ्कुरितास्तवृक्षः[3] ।
गजेन्द्रमारुह्य विभोस्समीपे प्रयाति **वेङ्कट्रमणाभिधानः**[4] ॥ ४४ ॥'

वि०—'अयं **तानविद्याया**मसदृश एव न सन्देहः। अयं महाराजोऽपि रसिकाग्रेसरः, येन विद्वत्सिंहगायकशार्दूलौ परिगृहीतौ स्तः।'

इति तद् भूपयुग्मं च परिवारयुगं[5] कवी ।
वर्णयन्तौ तयोः पश्चाद्ययतुः पण्डितोत्तमौ ॥ ४५ ॥

(टि०) १. भार्गवो वाल्मीकिः शुक्रो वा, स इव कवितायां शूर इत्यभिप्राय इति भाति। किंचोपरि अस्य 'परशुराम' इति व्यक्त नामनिर्देशात् भार्गवशब्दे श्लेषोऽपि ग्राह्यः। २. तयोः तथाभिन्नयोर्भ्रात्रोः वेङ्कटाचलवेङ्कटकृष्णयोः। यदा प्रभू भ्रातरावुभावपि अविभक्तौ तदा तयोर्मध्ये कस्य प्रभोरयमास्थानविद्वान् इति प्रश्नस्य नावकाशः। वाक्यच्छाया च द्राविडीसंभाषणशैलीमनुकरोति। ३. अस्तः मृतप्रायो वृक्षः, 'पट्टुप्पोन' इति द्राविडयुक्तेरनुवादः। ४. वेङ्कट् इति अत्रापि वेङ्कटेत्यस्य लौकिकमपभ्रष्टं रूपम्। ५. युतमिति साधीयान् पाठः।

तदनु महाराजोऽपि[1] स्वसेवकेन **राज्याधिपत्यनियुक्तेन** [2]**वेङ्कट्रामम**हीपालेन पूर्णकुम्भविराजितपाणीनन्तर्वाणीन्[3] पुरस्कृत्य अभिरामाभिः वाररामाभिः साकं महाराजवितीर्णैः रथगजतुरगपदातिपरिपूर्णैः वाद्यविशेषाकीर्णैः **नवस्थलावतीर्णै**-रिव[4] सेनाजनैर्मदविभू(ष)णैः[5] सह* प्रत्युद्गम्यमानः तदाज्ञाधुरन्धरैः सेवकवरैः ध्वजतोरणपताकादिभिः अलंकृतां **तोयाद्रिनगरीं**[6] श्रीमता **रङ्गनायक**महीपाल-चक्रवर्तिना साकं वन्दिजनपापठ्यमानस्वापदानपद्यश्रवणजनितानन्दभरितः स्वस्य[7] परितः कृतानुसारैस्सुपरिवारैश्च सह प्रविवेश ।

तदनु प्रविश्य नगरीं तां तौ कान्तौ राजवरौ तदा ग्रामप्रदक्षिणं कृत्वा स्वावासस्थानमापतुः ।

ततस्तेऽपि महाराजास्सर्वे **कालिङ्गराण्मुखाः** ।
समाजग्मुस्तदाहूता रथोत्सवदिदृक्षवः ॥ ४६ ॥

वेङ्कट्राममहीपालस्तेषां स्थानं प्रदर्शयन् ।
सोपचारं ततस्सर्वान् प्रावेशयदयं स्वयम् ॥ ४७ ॥

ततः पण्डितशार्दूलौ प्रविश्य नगरीमिमाम् ।
वेङ्कट्राममहीपेन भेजाते दर्शितं स्थलम् ॥ ४८ ॥

अथ तौ पण्डितश्रेष्ठौ स्नानार्थं **सरसीं** शुभाम् ।
समेत्य च तदालोकजनितानन्दमापतुः ॥ ४९ ॥

(टि०) १. वेङ्कटाचलः । २. वेङ्कटराम इति साधु रूपम् । ३. विदुषः । ४. नवस्थलं चेन्नपुर्यां सेनानिवेशस्थानं किमपि । ५. मदविभूषणैः उद्धतैः । ६. पूर्वोक्तं तिरुनीर्मलै इति मद्रनगरीनिकट एव वर्तमानं स्थलम् । ७. 'स्वं परितः' इति भवितव्यम् ।

---

* MS सः

वि०—'सखे! पश्य—

कारण्डवरवाकीर्णा सारसाढ्येव[1] कामिनी।
पद्मानना चारुवाचा सरसीयं धिनोत्यलम् ॥ ५० ॥

किंच—

स्वस्मिन्निमज्जतो मुक्तिं ददामि सकृदित्यलम्।
वदन्तीवास्ति पश्येमां सरसीं पक्षिनादिताम् ॥ ५१ ॥'

अति०—'सखे! किमस्याः प्रभावं वक्ष्यामि; किं बहुना?

अस्यां सरस्यां यः स्नाति तस्य मुक्तिस्सकृद्भवेत्।
नात्रास्ति संशयो धीमन्निति वेदवचोऽस्ति हि ॥ ५२ ॥'

इति परस्परं तां सरसीं प्रशंसन्तौ सभक्तिश्रद्ध स्नात्वा, कृत्वा च माध्यन्दिनं नियमं गृहमुपेत्य शिवपूजादिकं सर्वं विधाय **श्रीतोयगिरिस्थितिविधायक-श्रीरङ्गनायकं** द्रष्टुमुद्यतावभूताम्।

ततस्तद्दर्शनार्थाय गच्छन्तौ **तोयभूभृतम्**।
दर्शनेन भवेद्यस्य विमुक्तिस्तमपश्यताम् ॥ ५३ ॥

वि०—'सखे! किमयमत्याश्चर्यकरो वर्तते गिरिः। तथाहि—

नायं मेरुर्न कनकमयो नापि कैलासभूभृ-
द्यस्मादास्ते न रजतमयो नापि पाषाणशैलः।
तोयाद्रित्वाद्गगनकुसुमं दृश्यते पश्य विद्वन्
न्यायज्ञानां भवति . . . . * ॥ ५४ ॥'

अति०—'सखे! भवति चेदं देवतारहस्यम्। केन वा ज्ञातुं शक्यते?'

(टि०) १. सारसाढ्या सारसाख्यपक्षिणेति सरसीपक्षे, कामिनीपक्षे च रशनया आढ्या, सा रसाढ्या इति वा योज्यम्।

* MS The rest of the line scribbled over.

वि०—'तर्हि आस्तामिदम् ।'

इत्युभावपि पर्वतश्रेष्ठमारुह्य तस्याग्रे वर्तमानं गोपुरवरमपश्यताम् ।

अति०—

'एतच्च गोपुरं भाति राहोश्शिर इवोत्थितम् ।
विधुं जिघृक्षोः पश्येम शृङ्गसङ्गित्रिविष्टपम् ॥ ५५ ॥'

इति गोपुरं वर्णयन्तौ आलयान्तर्गत्वा प्रदक्षिणनमस्कारानन्नेकान् विधाय भगवन्तमखिलाण्डकोटिब्रह्माण्डनायकं श्रीरङ्गनायकं दृष्ट्वा स्तोतुमुपचक्रमाते । तथाहि—

'श्रीरङ्गनायक विभो भगवांस्त्वमेव
यस्मात्सुखं शयनमद्भुतमातनोषि ।
लक्ष्म्येलया सह च सुन्दररूपयेत्थं
सृष्ट्यादिकार्यकरणाय नियुज्य तांस्तान् ॥ ५६ ॥

श्रीरङ्गनायक विभो जलशैलमेकं
निर्माय तत्र वसतिं कुरुषे कुतस्त्वम् ।
तल्पीभवत्फणिमहीपविषाग्निजन्य-
दाहार्तिशान्तिमतिरेव किलात्र बीजम् ॥ ५७ ॥'

इति स्तुतिप्रसन्नोऽसौ युवयो रङ्गराड्दया ।
भूयादित्याशिषं साधु चकार रङ्गनायकः ॥ ५८ ॥

तत्प्रसादं च तौ लब्ध्वा बहिरेत्य तदालयात् ।
अवरुह्य गिरेस्तस्माज्जग्मतुर्वासमन्दिरम् ॥ ५९ ॥

तदनु तौ भुक्त्वा किंचित्कालं विश्रम्य उत्थाय **एतदालयधर्मकृतं श्रीरङ्गनायकमहीपालयुतं परशुरामकवितार्किकशार्दूलविराजितं वेङ्कटरमणाभिधानगायकसिंह**सुशोभितम्, अन्यैश्च विद्वद्वरैर्गायकनरैर्[1]श्चोल्लसितम्, भृत्य-

(टि०) १. गायकनरैः गातृलोकैः; अथवा गायकवरैरित्येव पाठः स्यात्।

जनधृतच्छत्रोद्दामम्, वाराङ्गनामणिसंवीज्यमानचामराभिरामम्, अभङ्गुरनिजापाङ्ग-तरङ्गसङ्गताश्रितस्तोमम्, वन्दिजनजेगीयमानस्वबिरुदश्रवणकामम्, स्वसौन्दर्यातिशयतिरस्कृतकामम्, अप्रतिमम्, अङ्कुरमुक्ताहाराद्यलङ्कृतसदस्सीमम्, भूपति[1]-ललामम्,* अनवरतविधीयमानसकलजनाभीष्टदानम्, श्रितजनकृतबहुमानम्, कृतसङ्गीताद्यनुभवविधानं दृष्ट्वा आनन्दपरवशीकृतात्मानौ स्तुतिं चक्रतुः ।

तथाहि—

'पिण्डिकूरुवेङ्कटाद्रिमण्डलेश्वर प्रभो
गण्डदेशराजमानकुण्डलोरु*भाश्रित[2] ।
अण्डजेन्द्रवाहरङ्गमण्डनातिलुब्ध[3] मां
पण्डितेन्द्रमाशु रक्ष खण्डितारिषट्क तम् ॥ ६० ॥'

इति स्तुतो महाराजो[4] वर्णलक्षाण्यदात्तदा ।
गृहीत्वा तानि सन्तुष्टौ स्वावासस्थानमापतुः ॥ ६१ ॥

तदनु,

वि०—'सखे! श्वः प्रातरेव रथोत्सवो भविष्यति । तदानीं जनसंघो महानेव स्यात् । अत इदानीमेव पुरीमिमां सम्यक् पश्यावो नूतनरथं चालङ्कृतम्' इत्युभावपि उभयदर्शनाय अगच्छताम् ।

तदनु महाराजोऽपि[5] श्रीमता **रङ्गनायक**महीपालेन साकं भगवद्दर्शनाय गत्वा पर्वतोत्तममारुह्यानेकप्रदक्षिणनमस्कारपूर्वकं भगवद्दर्शनमकरोत् । तदानीं भगवन्तं तुष्टाव महाराजः[6] । तथाहि—

(टि०) १,४,५,६. अत्र सर्वत्र पिण्डिकूरिवेङ्कटाचलोऽभिप्रेतः । २. कुण्डलयोरुर्वी भा तया आश्रित; अथवा कुण्डले एव उरुणी भे, ताभ्यामाश्रित; अथवा कुण्डलोरुभासित इत्येव पाठः स्यात् । ३. गरुडवाहनस्य रङ्गपतेः मण्डने अलङ्करणे अतिलुब्ध ।

---

* MS. Letter doubtful, written over again.

'स्वामिन् रङ्गपते न ते किल समः को वा भवेत्तेऽधिक-
स्तस्मात्त्वं शरणं समस्तजगतामित्येव मत्वान्वहम् ।
त्वत्कैङ्कर्यविचारणैकनिरतं मन्मानसं विद्यते
मय्येवंविधमार्गयायिनि दया न स्यात् कुतस्ते हरे ॥ ६२ ॥'

रङ्गनायकमहीपालस्तूष्णीं ध्यानं कुर्वन्नतिष्ठत् । तत्राह कविः—

'[1]आत्मस्तुतिस्तु दोषः स्यादिति मत्वैव **रङ्गराट्** ।
स न चक्रे स्तुतिं तस्य महात्मा पुरुषर्षभः ॥ ६३ ॥'

तदनु महाराजः **रङ्गनायकेन** साकमालयाद्बहिर्निर्गत्य, पर्वतोत्तमादवरुह्य च यथास्थानं प्रविष्टस्सन् उत्सवार्थमागत्य विद्यमानानां **कालिङ्गराय**प्रभृतीनां सर्वेषामपि राज्ञामत्यद्भुतमातिथ्यं विधाय तस्यामेव रात्रौ सदो महत्कर्तुम् उद्युक्तो बभूव ।

तदनु तौ पण्डितेन्द्रौ च संघाधिक्ये पुरदर्शनाशक्तौ भूत्वा सम्यगलङ्कृत्य स्थापितं रथमतिसुन्दरमिमं केवलं दृष्ट्वा तत्रैव सरस्यां सन्ध्यामुपास्य, भुक्त्वा 'महाराजसदः प्रवेक्ष्यावः' इत्यालोच्य तथैव द्वावपि रथसमीपं प्राविशताम् । तदनु,

वि०—

'रथोऽयं वर्तते विद्वन् पथा (यथा ?) व्योम्नोऽतिनिस्सृतः ।
[2]कथायाः (कथया ?) किं सुरेशस्य तथे(थै ?)व रथ उज्ज्वलः ॥ ६४ ॥'

(टि०) १. स्वस्य भगवतश्च समानाभिधत्वाद् भगवतो रङ्गराजस्य स्तुतिः स्वस्य स्तुतिः स्यादिति । वस्तुतस्तु तदानीं श्रीरङ्गनायकः यद्यपि स्वयं तोयाद्रेः परम्परागतः प्रधानधर्मकर्ता, तथापि बालो युवा वा आसीत्, तत्स्थाने पिण्डिकूरिवेङ्कटाचलेन सर्वं कार्यं निर्वर्तितमभूदिति ज्ञायते । २. कथया किम्, कि विस्तरेणेत्यर्थः । तोयाद्रीशरथः सूर्यरथ एव व्योमत आगत इति वर्ण्यते ।

अति०—'तथैवायमसदृश एव। एतत्कारयितुर्वेङ्कटाद्रिनृपतेः पुनर्जन्म नास्त्येव।'

वि०—'भगवानस्तं गत एव चण्डभानुः। ततः शीघ्रमेव सन्ध्यामुपास्य भुक्त्वा च महाराजसदः प्रवेक्ष्यावः।'

इति परस्परं वदन्तावेव तथा चक्राते।

तदनु महाराजाः सर्वेऽपि प्रत्युत्थानाद्युपचारैः सह तावात्मसममेव स्थापयामासुः। तदनु विवेकी महाराजवेङ्कटाचलनृपतिनाटकशालामलङ्कुर्वन्तीं-(तीं) वाराङ्गनामभिवीक्ष्य—

'इयं सौदामि(म)नी स्याद्वा नो चेत्काञ्चनवल्लरी।
मेघाभावे कथ विद्युत्तस्माद्धेमलतैव सा॥ ६५॥'

अति०—'इयमप्यज्ञातपूर्वा वा तव? तथा चेदुच्यते—

नाच्यारिति समस्तैश्च वाच्या वाराङ्गना प्रभोः।
प्राच्यादिदिक्प्रसिद्धास्य[1] मोच्या नापि च तापसैः॥ ६६॥'

वि०—'गाननाट्यादिषु समर्था **नाच्या**रिति यस्याः प्रसिद्धिः, सेयं वा?'

अति०—'इयमेव।'

वि०—'तर्ह्ययं प्रभुः सर्वोत्कृष्ट एव। यतः सर्वोत्कृष्टा एव विद्वद्गायकप्रभृतयो गृहीताः।'

अति०—'सखे! प्रभातवेला चासीत। तथाहि—

(टि०) १. अस्य प्रभोरित्यन्वयः। अथवा 'प्रसिद्धासौ, प्रसिद्धा सा' इति वा पाठः स्यात्।

मौकिलाः[1] खलु कूजन्ति कुक्कुटाश्च समन्ततः ।
भारद्वाजास्तथा चान्ये पक्षिणश्च तथोच्चकैः ॥ ६७ ॥

किंच—

भगवांश्च रथारूढो भवत्यद्य सखे शृणु ।
वाद्यघोषो महानेव जायते श्रोत्रमान्द्यदः ॥ ६८ ॥'

वि०—'भगवान् रथारूढोऽभूदेव । महाराजाश्च सर्वे समुत्थातुकामा इव भान्ति ।'

इति तयोः परस्परालापसमयमध्ये श्रीवेङ्कटाद्रिमहाराजः स सर्वानपि भूपतीनुद्दिश्य 'भगवान् रथारूढोऽभवत्; इतः परं त्वरया गच्छेत्; वयमपि स्नात्वा त्वरयागच्छामः' इत्युक्त्वा स्वयं पूर्वमेवोत्थाय गतः । तदनु महाराजा अन्ये च तथैवाकुर्वन् ।

इमौ पण्डितभूपौ च नित्यकर्माणि भक्तितः ।
भगवत्सेवनार्थं च कृत्वाभूतां समुद्यतौ ॥ ६९ ॥

तदनु, वि०—

'ब्राह्मणानां हि संघोऽयं सखे गच्छति भूरिशः ।
परं सिसेविषुर्नायं जिघृक्षुरपि वेद्म्यहम् ॥ ७० ॥

श्रोतव्यमुच्यते विद्वन् वेङ्कटाद्रिमहीपतिः ।
रथं चकार नव्यं हि तस्माद्दानं समाचरेत्[2] ॥ ७१ ॥'

(टि०) १. काकाः; मौकलिः अथवा मौकुलिरिति परिचितः काकवाची शब्दः; तस्य मौकिल इति रूपभेदः स्यात् । २. नूतनं रथं निर्माय तेन प्रथमं रथोत्सवं प्रवर्तयता प्रभुणा ब्राह्मणसंघेभ्यो दानानि दक्षिणाश्च प्रदीयन्ते । पूर्वश्लोके भूरिश इत्यस्मिन् पदे किंचिदिव श्लेषच्छाया, यतः भूरिशब्दस्य व्यवहारे भूरि दीयमाने दाने सकोच्चो दृश्यते । ब्राह्मणसंघो न केवलं परं देवं सेवितुमिच्छन् गच्छति, अपितु भूरिदानं जिघृक्षुरपि ।

अति०—

'सर्वं ते ज्ञातमेवास्ति यत एवासि बुद्धिमान् ।
मूढस्य कस्य किं वा स्याद्बुद्धिः सर्वत्र कारणम् ॥ ७२ ॥'

इति विवेकिनं स्तुवन्नतिविवेकी साकं तेनैव किंचिद् दूरं गत्वा आह—'सखे! संघो महान् तिष्ठति । कथ रथसमीपं गमिष्यावः? तथाहि—

संघोऽयं वर्तते धीमन् समुद्र इव दुस्तरः ।
[1]तिले च पातिते भूमौ न पतेद् भुवि लोकय ॥ ७३ ॥'

इति संघं वर्णयन्तावतिकष्टेन रथसमीपं गत्वा षोडशमहादानप्रमुखानि दानानि कुर्वाणं सत्त्वगुणविजितगीर्वाणं सततभजित**श्रीरङ्गनायक**सुपर्वाणं, सदा कलिताश्रितजननिर्वाणं, बहुद्रव्यव्ययकारितगोपुरादिनिर्माणं, सन्ततानुष्ठितसत्कर्माणं, चतुर्विधोपायभेदितशत्रुमर्माणं, **श्रीवेङ्कटाचलशर्माणं** राजधर्माणं दृष्ट्वा तच्चारित्रावलोकनजनितानन्दभरितात्मानौ तं स्तोतुमारेभाते ।

'न मानवो भवान् राजन् किंतु मेघो विलक्षणः ।
* . . णवृष्टिर्येनास्मान् . . . †मेवमीदृशम् ॥ ७४ ॥'

तयोः स्तोत्रं निशम्यायं वर्णलक्षं पुनर्ददौ ।
गृहीत्वा तच्च तौ मोदमपारं भेजतुस्तदा ॥ ७५ ॥

(टि०) १. द्रविडाभाणकानुसारीदं जनसंघातनैबिड्यद्योतकम् ।

---

* MS. Leaf broken at this end. † MS. Line scored over.

तदनु तत्कालकर्तव्ये कर्मणि समस्ते धर्मकर्त्रा क्षितिपालेन कृते सति जनाः सर्वेऽपि कन्दा(तक्षाय)स्कार (?)* प्रभृतयः रथाकर्षणहेतुभूतं रज्जुविशेषं करैर्गृहीत्वा रथं समाचकर्षुः(कृषुः) ।

तदनु स रथोऽपि रज्जुग्रहणव्याजमात्रतो धावितुमारेभे । जनाश्च गृहीतरज्जव एव तूष्णी[1] भगवन्नामानि सदोद्घोषयन्तः सहधावनमात्रमाचरन्तः तमपि धर्मकर्तारं पदे पदे स्तुवन्तो गता बभूवुः ।

तत्रान्तरे, वि०—

'सर्वे जनाः समधिरुह्य समाव्रजन्तं
श्रीरङ्गनायकविभुं च सखे रथं तम् ।
द्रष्टुः . . . †तव जन्म पुनर्न हीति
श्रीवेङ्कटाचलविभोः शृणु मुक्तिरेव ॥ ७६ ॥'

अति०—' महानपरोऽस्ति हि श्रोतव्यः—

[2]प्रवालनगरी रम्या चेन्नपुर्यां चकास्ति च ।
तन्नाथवल्लवीनाथालयधर्मोऽस्य वर्तते ॥ ७७ ॥

(टि०) १. अत्रापि तूष्णींशब्दः 'शुम्मा' इति द्रविडपदस्यानुवादः, भगवन्नामघोषमेव सदाचरन्तः अन्यत् किमपि न कुर्वन्त इत्यर्थं गमयति । २. चेन्नपुर्यां पवळकारवीथीति प्रसिद्धा, यत्र कृष्णालयो वर्तते ।

---

* MS The second letter here may be ळा or डा or न्दा. The meaning of the word *Kalāskāra, Kanāskāra or Kandāskāra* is not clear.

† MS. Here again the word is scored over.

किंच—

[1]उद्यानं महदस्ति खे च विबुधैरभ्यागतैः स्वर्गत-
स्तत्रत्याद्भुतवापिकामृतसमं पीयूषमास्ते न वा ।
इत्याशङ्क्य परीक्षणाय सफलैः पीयूषकुम्भोज्ज्वलै-
रत्यन्तोन्नतनालिकेरतरुभिः सान्द्रीकृतं ह्यद्भुतम् ॥ ७८ ॥

उद्यानात्सुमनोहराच्छिवमुखामर्त्योत्तमाराधन[2]
कुर्वन्त्यद्भुतमत्रपुष्पनिकरानादाय सर्वे जनाः ।
तीर्थं चाधिकनिर्मलाम्बुविलसत्पद्माकरादन्वहं
तस्माद्भूरिपयोजराजिसुभगाद्विप्रेन्द्रमुख्याः खलु ॥ ७९ ॥

अपिच—

तन्मध्येऽस्ति च केलिसद्म विमलादर्शादिसंशोभितं
राजन्नव्यवितानकान्तिलसितं मुक्ताकलापावृतम् ।
स्वाधोदेशगरत्नकम्बलतलभ्राजत्सुरत्नोज्ज्वल-
[र]प्रत्युप्तोन्नतहेमपीठवरसन्दोहाभिरामं सखे ॥ ८० ॥

अथ च—

तत्र तेन रविवासररात्रौ मित्रजालसहितेन सभा च ।
छत्रचामरयुतेन सद(दा?)लं सत्रकृज्जनवृता क्रियते हि ॥ ८१ ॥

(टि०) १ नालिकेरव्याजादेतदुद्यानतुल्यं देवोद्याने तत्तदस्ति किमिति दिदृक्षार्थम् एतदुद्यानमेव देवा आगता इति भावः। २. शिवमुखा अमर्त्योत्तमाः शिवादिदेवताः ।

तदानीं च,

कविविद्वद्गायकेभ्यो द्रविणानि ददाति हि ।
सविशेषं रहस्येव भुवि को वास्ति तत्समः ॥ ८२ ॥

तस्मादस्य कश्चिद्धर्मो वर्तते कश्चिद्धर्मो नास्तीति न । रहस्येव क्रियते सर्वमडाम्भिकत्वात् ।'

वि०—'तथैवायं महाराजः विश्रुतश्च । सखे! किमाश्चर्यम्, नेत्रनिमीलनोन्मीलनान्तरे[1] एव रथोऽयं स्वस्थानमुपेत्य वर्तते ।'

अति०—'तूष्णीं भगवदाज्ञया अयं स्वस्थानमुपागतः ; नाकर्षणक्रियया ।'

तत्रान्तरे,

देवाः समेत्य नभसि प्रभुणा समेताः
पुष्पाणि चातिसुरभीणि [2]ववर्षुरुच्चैः ।
भेर्यस्तदा समभवन् भृशताडितास्तै-
र्वाराङ्गना विदधिरे सुचिरं च नाट्यम् ॥ ८३ ॥

तदनु महाराजोऽपि सर्वराजशिखामणिभिः साकमेव तमे* . . त्वा सर्वेषां रथकारादीनां वाचामगोचरं बहुमानं च कृत्वा सर्वान् राजशिखामणीन् पुरस्कृत्य स्वनिकेतनमुपेत्य, तैः सममेव भुक्त्वोत्थाय सदः कृत्वा, चन्दनपुष्पताम्बूलादिभिस्तान् राजशिखामणीन् सम्यक् संपूज्य चेन्नपुरं प्रतिगन्तुमुद्युक्तान् तान् प्रस्थाप्य स्वयमपि प्रस्थि(स्था)तुं मनश्चकार ।

(टि०) १. इदं च द्राविडसंभाषणानुसारि । २. अत्र ववृषुरिति भाव्यम् ।

---

* MS. Leaf broken at this end, two letters missing.

ततः[तौ]*पण्डितराजौ च निर्गत्य नगराततः ।
स्वकीयविभवैः साकं ययतुः पत्तनं प्रति ॥ ८४ ॥

तदनु गच्छन्तौ तावुभावपि चेन्नपत्तनसमीपं गत्वा 'इत एवादिपुरीं[1] गत्वा तद्राजं **त्यागराजं**[2] दर्शनपथातिथिं कृत्वा गृहं प्रविशावः' इत्यालोच्य तथैवाकुरुताम् ।

तावादिपुरमुद्दिश्य गच्छन्तौ तदपश्यताम् ।
त्यागराजालयोद्भासि गोपुरं हेमशोभितम् ॥ ८५ ॥

वि०—'पश्य,

लोकाः समस्ताः शृणुतास्ति कान्या मत्तः सुराणां नगरीति वाचम् ।
(उदीर?) †यन्तीव पुरी विभाति काकेति वाचा बलिभुग्व्रजस्य ॥८६॥

‡ नालिकेरतरवो . . . मस्तकोपरिलसत्फलवृन्दा(:) ।

(टि०) १. आधिपुरीति समीचीनं नाम; तिरुवोत्तियूर् इति चेन्नपट्टण-निकटवर्ति प्रसिद्धं क्षेत्रम् । २. तत्रालये वर्तमानो मुख्यो मूर्तिविशेषः ।

---

* Excess, hypermetric.
† MS Leaf broken at this end.
‡ MS Writing effaced The writing in a large portion of this leaf is indistinct. This leaf marks the end of a set of leaves written in a fresh and less neat hand; from the next, the old neat hand starts again, from which it appears that the previous leaves in a fresh hand are a copy intended to replace probably damaged leaves. The next original leaf starts abruptly with 'यन्त' and the scribe forgot to or could not recopy the first two letters of this line, which may be 'अर्प'. The verse describes the helpfulness to the devotees of the cocoanut groves adjoining the temple.

(अर्प)यन्त इव भान्ति जनानामस्य दर्शनमह[ा]त्त्वमितीह[१]॥८७॥'

इति परस्परमानन्दतः संलापं कुर्वन्तौ फुल्लानेकमल्लीकुसुममतल्लीपरिमलकल्लोलज-समुल्लासैकनिलयौ तौ पण्डितेन्द्रौ पुरवरपरिसरमुपेत्य गृहमेधीन्द्राणामतिस्वाधीन-देवताकानामनुपार्श्व(?) *भाजां वीथीर्द्विजानां प्रदक्षिणतः पश्यन्तावानन्दमनु-भवन्तौ क्रमेण महादेवश्रीत्यागराजसन्निधिवीथीं च प्रविश्य अग्रे प्रविलस-द्गोपुरवरमपश्यताम् ।

अति०—'सखे! पश्य—

एतद्भाति च गोपुरं प्रविलसद्दीपत्रयालंकृतं
राजत्तुङ्गसुशृङ्गपञ्चकयुतं तत्सङ्गिदेवापगम् ।
[२]अग्न्यैकाहितलोचनत्रयलसत्पञ्चास्यशीर्षोल्लसद्-
गङ्गं त्र्यम्बकदेववत् सुहृदिदं पश्याधिकानन्ददम् ॥ ८८ ॥'

इति तया च वीथ्या तत्रत्यापणाननेकांश्चानेकसंभारसंभृतान्विलोकयन्तौ शनैः शनैर्गत्वा सरस्तटं स्वनिकटविलसद्धर्ह(र्हि?)कूटमुपाविशताम् ।

(टि०) १. अत्र देवदर्शनस्य महत्त्वमियत्, यद्दर्शनसमनन्तरमेव निकटस्थनालिकेरतरवः फलान्युपहरन्ति; दर्शनानन्तरं नालिकेरोपवनेषु विश्रान्ता भक्तास्तत्र नालिकेरासवं पिबन्ति; अत एवमुत्प्रेक्षा । २.'अग्न्यै-काहिते'त्यस्फुटम्; अर्थस्तु स्फुट एव; अग्न्यर्कसोमात्मकं शिवस्य लोचनत्रय-मत्राभिप्रेतम् । अत्र गोपुरत्र्यम्बकयोरुपमा; दीपत्रयनेत्रत्रययोः, शृङ्गपञ्चकवक्त्र-पञ्चकयोः, उभयत्रसङ्गिगङ्गयोश्च साम्यम् ।

* MS. च्च first and then correction श्च.

तदनु,

वि०—'शिलासोपानराजिराजिततटचतुष्टयं जलमध्यस्थितषट्स्तम्भोद्गुम्भितमण्टपसनाथमश्रान्तोत्तुङ्गतरङ्गचञ्चलीकृततया अवगाहनार्थागतपौराङ्गनावदनविलोकनसमुद्भवत्तद्युद्धबुद्धिसंबद्धोत्साहपरिकल्पितनर्तनानीव बहुपद्मानि जलचरपतङ्गरवमृदङ्गरतियुतानि[1] भृङ्गराजिकृततुङ्गझंकृतिगीतिरीतीनि दधानं, तत्क्षणोद्भूतमज्जन्मुक्तिविधानं, [2]सन्ततपःकृततडाकमेतत्तटाकं पश्य पश्य ।

ततः,

'तटाकमेतस्य कटाक्षपात्रं नटाधिराजस्य जटाधरस्य ।
[3]विटाग्रगण्येममटाव शीघ्रं तटाधिरूढोच्चवटाभिरामम् ॥ ८९ ॥'

इति तद्वाक्यं श्रुत्वा,

अति०—'एतत्तीर्थमहिमा अपार एव समुद्रवत् ।'

इति परस्परं वदन्तौ उभावपि जलमुपेत्य समन्त्रघोषं स्नात्वा भगवतीं सन्ध्यामप्युपास्य भगवतः श्रीत्यागराजस्य त्रिपुरसुन्दरीसमेतस्य दर्शनाय गन्तुमुद्यतावभूताम् ।

सेवार्थे **त्यागराजस्य** गच्छद्भ्यां लिङ्गभूपतिः ।
मार्गमध्ये बुधेन्द्राभ्यां दृष्टः स्वाश्रितसंवृतः ॥ ९० ॥

दृष्ट्वा तं स्तोतुमारब्धं बुधेन्द्राभ्यां महीपतिम् ।
सर्वस्तोत्रास्पदीभूतं शर्वभक्तियुतं सदा ॥ ९१ ॥

(टि०) १. झतियुतानीति स्यात्; तालाक्षराणां वाचानुवादो झतिः । २. सन्ततपसा तत्तीरोपान्ते साधुभिः क्रियमाणेन कृता तडाका प्रभा यस्य तम् । ३. विटाग्रगण्येति सख्यप्रयुक्ता सोपहासोपालम्भा मित्रस्य संबुद्धिः ।

तथाहि—

'लिङ्गप्पक्षितिपाल! कीर्तिरतुला ते सन्ततं वर्धते
त्यागेशालयधर्मकृत्त्वजनिता त्वज्जन्म जन्मैव हि।
अन्यैस्त्वत्समताभिमानसहितैः किं भूमिभारैः पुरा
स्वीयस्वीयपितृप्रकल्पितमहाधर्मप्रहाणोद्यमैः ॥ ९२ ॥'

इति ताभ्यां कृतां स्तुतिं महाराजोऽपि श्रुत्वा अतिसन्तुष्टमनाः तत्क्षण एव ताभ्यां वर्णलक्षाणि[1] प्रादात्।

तदनु,

गृहीत्वा वर्णलक्षाणि तेनैव सह पण्डितौ।
तावालयं महेशस्य जग्मतुर्भूरिभक्तिकौ ॥ ९३ ॥

तदनु तौ तदालयीयध्वजस्तम्भपर्यन्तं गत्वा तत्र प्रणामसहस्रं च कृत्वा ततः प्रदक्षिणान्यनेकानि च विधाय अन्तरालयं च गत्वा मूलस्थानस्थितं **वल्मीकनाथं**[2] स्तोतुमारेभाते।

तथाहि—

'आदिपुरीश्वर मोदय शीघ्रं सादर संप्रति खेदमकुर्वन्।
वेदशिरःप्र(तिपा)दित शम्भो नादमयास्तविभेद दयालो ॥ ९४ ॥'

इति तं भगवन्तं **वल्मीकनाथं** स्तुत्वा, स्तुतिप्रसन्नभगवत्परिकल्पितापाङ्गवीक्षणमपि लब्ध्वा, प्रदक्षिणतः समागमनवेलायां तत्रैव दक्षिणाभिमुखतया विद्यमानं कोटिसूर्यप्रकाशं **सभेशं**[3] दृष्ट्वा प्रार्थनां चक्रतुः। तथाहि—

(टि०) १. अक्षरमक्षरमुद्दिश्य लक्षमितानि धनानि। २. आधिपुरालये मूलस्थानदेवताया नाम वल्मीकनाथ इति। ३. नटराजमूर्तिं तत्र व्याकरणदानमण्टपे विराजमानाम्।

'सभापतिः प्रभालसद्विभावरीशभानुदृक्
स्वभावशुद्धभावमुक्त्यभाववादभानभीः[1] ।
सदा सुखप्रदानधीः कदा भवेन्मुदालयो
विदारितारि*दानवः पदाब्जधृद्धृदामयम्[2] ॥ ९५ ॥'

इति तं(सं?)प्रार्थितेन तेन सभानाथेन सद्यः कृतं कटाक्षं च लब्ध्वा अन्तरालयात् बहिरेत्य तत्रैव महामण्टपे देदीप्यमानमशेषदेवराजं मकुटतटघटितार्धद्विजराजं सृष्टिस्थितिसंहाराधिकारभाजं **श्रीत्यागराजं** दृष्ट्वा आनन्दपरवशौ भूत्वा निस्तुलां स्तुतिं प्रस्तुतां विस्तारयाञ्चक्रतुः । ततस्तमपि तौ प्रार्थयामासतुः । तथाहि—

'इदानीं श्रमं मे हृदा वीक्ष्य शम्भो
मुदा पाहि सर्वप्रदानेन शीघ्रम् ।
निदानं त्वमेवास्युदाराखिलानां
यदा **त्यागराज**स्तदा देयमेव ॥ ९६ ॥'

इति तमपि तौ सम्यक् प्रार्थयित्वा[3] स्वभक्तिपरतन्त्रश्री**त्यागराज**परिकल्पितपूर्ण-कटाक्षलाभानन्दभरितहृदयौ भूत्वा ततः प्रदक्षिणतः समेत्य **त्र्यम्बकेशं**[4] ददृशतुः ।

अति०—

'नमामि शिरसा देवं क्रमात् **त्र्यम्बक**नामकम् ।
भ्रमादपि च नान्यं हि श्रयाम हृदये परम् ॥ ९७ ॥'

(टि०) १. अर्थो न स्फुटः । २. पदाब्जधृद्धृदाम् हृदयेन धृतभगवत्-पदानाम् इत्यर्थः । अयं सभापतिरित्यन्वयः । ३. प्राथ्र्येति भवितव्यम् । ४. इयं च त्र्यम्बकेशमूर्तिस्तत्र त्यागराजालयस्य पृष्ठे वर्तते ।

---

* MS. गारि.

इति स्वभक्तिदार्ढ्यं **त्र्यम्बकेशाय** महाप्रभवे प्रदर्श्य विवेकिना साकं क्रमात् प्रदक्षिणतः [1]**त्रिपुरसुन्दरी**सन्निधिमवाप ।

तदनन्तरं तामपि स्तोतुमारेभे । तथाहि—

' किमन्यविबुधैः फलं तव पदाब्जरेणूद्भवै-
स्त्वमस्यखिलकारणं शरणमद्य भूयास्ततः ।
नमन्नृषु दया शिवे तव सदैव भूयात्खलु
श्रमं मम निराकुरु **त्रिपुरसुन्दरि** प्राक्तनम् ॥ ९८ ॥'

इति स्तुतिप्रसन्ना सा कटाक्षमकरोत्तयोः ।
लब्ध्वापाङ्गमिमौ तस्या बहिर्ययतुरालयात् ॥ ९९ ॥

ततस्तौ क्रमात्तत्पुरं विहाय गच्छन्तौ ' इत एव **बृन्दारण्यनगरीं**[2] प्रविश्य सकलदुरितहारिण्यां **कैरविण्यां**[3] स्नात्वा दयाशरधेः **पार्थसारथेः**[4] दर्शनमपि कृत्वा श्व एव सोमवासरे स **कालिङ्गमहाराजः** तत्रत्योपवनतल्लजमनेकैः सुहृद्भिः **श्रीरङ्गनायकदेवनायकवेदाचल**महीपालप्रभृतिभिः सह समुपविश्य तत्सुहृदातिथ्यपूर्वकमेव महासदः करिष्यति; तत्समये तत्र च गत्वा तत्र विद्यमानान् समस्तानपि महीपतीन् वीक्ष्य तदनन्तरं गृहे प्रविश्य सुखेन स्थास्यावः' इत्यालोच्य तथैवाकुर्वाताम् ।

अथ ताभ्यां हि गच्छद्भ्यां बुधसद्भ्यां **महापुरी**[5] ।
रथवाजिगजाकीर्णा प्रथमं सा विलोकिता ॥ १०० ॥

(टि०) १. आधिपुरीशालयस्थदेवीनाम त्रिपुरसुन्दरीति । २. कैरविणी, तिरुवल्लिक्केणीति प्रसिद्धं चेन्नपुर्यन्तर्भूतं स्थानम् । ३. तत्रत्यायाः पुष्करिण्या नाम कैरविणी । ४. तत्रत्यविष्णुमूर्तिः पार्थसारथिः । ५. ' पेद्दनायकन् पेट्टै ' इति ख्यातम् अथवा ' पेरियमेट् ' इति ख्यातं स्थलं स्यात् , यत्र स्कन्धावार आसीत् ।

ततः पुरीं प्रविश्येमौ वीथ्या वीथीमतीत्य च ।
अपश्यतां **कैरविणीं** पश्यदानन्दकारिणीम् ॥ १०१ ॥

तदनु, वि०—

'पश्यैतस्यास्तटं विद्वन् पौराणिककुलाकुलम् ।
श्रोतृलोकगणाकीर्णं दातृमण्डलमण्डितम् ॥ १०२ ॥'

अति०—'सखे! किमस्याः प्रभावं वक्ष्यामि । पश्य पश्य,

कैरविण्यां सकृत् स्नात्वा कैरवन्त्य*विमुक्तिका[1] ।
[2]कैरवाक् प्राप्यते नेति कैरवेशास्य जायते ॥ १०३ ॥'

वि०—'कथमेभिः कीरैरयमर्थो बुद्धः? कथं वैतादृशवाक् अभ्यस्ता? कथं वा एते चेत्थं शिक्षिताः? किमाश्चर्यं! किमाश्चर्यम्!'

अति०—'अश्रान्तपौराणिकपठितं(त)पुराणबलादेव विलासार्थाहृतानां तीरस्थमण्टपोद्बद्धपञ्जरस्थितिशालिनामेतेषां सर्वमित्यवेहि ।'

वि०—'सखे! तथापीदमाश्चर्यमेवास्ते ।'

अति०—'सखे! पश्येमां **कैरविणीम्** ।

इयं **कैरविणी** चास्ते श्रियं स्वस्मिन्निमज्जताम् ।
प्रियं चान्यद्ददामीति स्वयं वक्तुं हसन्त्यलम्[3] ॥ १०४ ॥'

वि०—'सत्यमेतस्याः कुमुदशालिन्या दर्शने तथैव जायते ज्ञानम् ।'

(टि०) १. कैः अवन्ती अविमुक्तिका । अवन्ती नाम महाक्षेत्रम् । अविमुक्तिका काशी । २. कैरवाक्, तीरस्थकीराणा वाक् । कैरवेशास्य चन्द्राननेति सुहृदः संबुद्धिः । कैरविण्यां सकृत्स्नातैः कैः अवन्त्यादिमहाक्षेत्रादिसेवाफलं न प्राप्यते इति तत्रस्थकीरैः उच्यत इति भावः । ३. कैरवश्रिया हसन्तीवेत्युत्प्रेक्षा ।

---

* MS. न्त्या.

अति०—'तिष्ठतु । अस्यां स्नात्वा भगवद्दर्शनाय त्वरया गच्छावः । महाराजाः सर्वेऽपि **कालिङ्गराय**प्रभृतयः तस्यां स्नात्वा द्विजेभ्यः दानं कुर्वन्तस्तिष्ठन्ति । इतः परं भगवद्दर्शनाय आगच्छेयुः । तदानीं भगवद्दर्शनं सम्यक् न भवेत् । ततः प्रथममेव भगवन्तं दृष्ट्वागच्छावः ।'

इत्युभावप्यालोच्य स्नात्वा च तस्यां भगवद्दर्शनाय तदालयं जग्मतुः । ततस्तौ,

असंख्याकान्नमस्कारान् प्रदक्षिणविधीनपि ।
कृत्वा तत्सन्निधिं प्राप्य स्तुतिं चक्रतुरुज्ज्वलाम् ॥ १०५ ॥

तथाहि—

'स्वामिन्**नर्जुनसारथे** तव दयालेशेन देवाधिपः
तत्त्वं[1] प्राप चतुर्मुखोऽपि भगवान् तत्त्वं[2] प्रपेदे तथा ।
मुक्तास्तत्त्वमनेन[3] चापुरितरस्सर्वं फलं चेतरे
तेनैवापुरतोऽस्ति[4] पूर्णकरुणोत्पाद्यं फलं किं हरे ॥ १०६ ॥'

भगवानपि,

स्तुतिप्रसन्नहृदयः कटाक्षमकरोत्तयोः ।
लब्ध्वा तौ तत्कटाक्षं च निर्जग्मतुरथालयात् ॥ १०७ ॥

वि०—'सखे! **पार्थसारथि**दर्शनमत्यद्भुतं वर्तते। नैतत्सममस्ति लोके।'

अति०—'साक्षात्परब्रह्मैव खल्वयम् ।

किंच—

पार्थसारथिरयं विदधाति प्रार्थनां कुरु करोमि च धीमन्[5] ।

(टि०) १. देवाधिपत्वम् । २. चतुर्मुखत्वम् । ३. तत्त्वं परब्रह्माख्यम् । ४. अतोऽस्ति; अतोऽधिकं किं फलमुत्पाद्यमस्ति । ५. 'प्रार्थनां कुरु करोमि च धीमन्' इति मध्ये सखायमात्मानं च परामृशत् अवान्तरवाक्यम् ।

सार्थकं जगति जन्म नतानां नार्थवाद इति चेदमवेहि ॥ १०८ ॥

अपिच—

'[1]अर्जुनसारथिभिल्लवरोऽसौ गर्जनपूर्वकमेव वितन्वन् ।
तर्जनमित्यपि पापमृगाणां निर्जनभूमिषु सञ्चरता[2](?) आस्ते ॥१०९॥'

वि०—'तथैवायं महानुभावः । न सन्देहः । सम्यक् प्रार्थनीय एव ।'

अति०—'सखे एतन्महानुभावालयधर्मकर्तारं दीनजनदैन्यापहर्तारं सर्वजनोपकर्तारं **अण्णासामिमहीभर्तारं** पश्य पश्य !'

वि०—दृष्ट्वा महाराजम्—'अयमेव वा ? न दृष्टपूर्वः । कुलक्रमं चास्य सम्यग्वद ।'

अति०—'सखे ! किमप्यजानन्निव पृच्छसि खलु; किं करोमि ?

एषस्तेऽपि न वर्तते हि विदितः पूर्वं वदामीदृशं
कापट्यं शृणु विस्मयावहमिदं किं वा तथाप्युच्यते ।
श्रीनारायणपुत्रपौत्र[3]**पदभाग्य्यासुतेन्द्रात्मभू-**
रण्णासामिमहीपतिः खलु सखे चैषः परं विश्रुतः ॥ ११० ॥'

(टि०) १. पार्थसारथिरत्र किरातरूपेण वर्ण्यते । २. अत्र तृतीया अनन्विता; 'सञ्चरः' इति स्यात्; सञ्चरः सञ्चारी । ३. पुत्रपौत्रेति । नारायणपुत्रः नारायणपिळ्ळै; 'पिळ्ळै' इत्यधुना द्राविड्या जातिविशेषवाचकतया प्रयुक्तमुपपदं केवलं आदरवाचकस्य 'पुत्र' इत्यस्य संस्कृतशब्दस्यैव परिवर्तः, यथा 'मुदलि' इति द्राविडजातिवाचकतया संकोचितः शब्दः केवलं प्राधान्यवाचिनः 'अग्रणीः' इति संस्कृतशब्दस्य । एवं च नारायणपिळ्ळैनामकस्य पौत्रः अय्यास्वामिपिळ्ळैनामकस्य सुतः अण्णास्वामिपिळ्ळैनामकः तिरुवल्लिक्केणिदेवालयधर्मकर्ता ।

वि०—'अयमपि तत्कालिङ्गमहाराजस्निग्धो वा।'

अति०—'न केवलं स्निग्धः, समानश्रीकश्च।'

वि०—'तर्हि सर्वेऽपि इमे भगवद्दर्शनं कृत्वा कालिङ्गमहाराजोपवनप्रवेशं कुर्युरिव भाति।'

अति०—'सखे! इवस्थाने एवकारो देयः।'

वि०—'तर्हि अत्र महाराजान् मिलितान् सर्वानपि दृष्ट्वा गच्छाव सदनं प्रति।'

अति०—'तथैव, तथैव।'

वि०—'तर्हि शिवपूजादिकं विधाय तत्र त्वरया पूर्वमेव गत्वा महाराजानामागमनविलासं पश्यावः।'

इत्युभावपि पूजाद्यर्थं निवासस्थलमुपजग्मतुः। ततस्तौ शिवपूजादिकं सर्वं विधाय त्वरया पूर्वमेव तदुद्यानसमीपं गत्वा क्वचिदुन्नतप्रदेशे स्थित्वा महाराजागमनं प्रतीक्षन्तौ(माणौ) मध्ये मध्ये तदारामरामणीयकं च पश्यन्तावतिष्ठताम्।

ततस्ते राजानोऽपि भगवद्दर्शनं कृत्वा कुम्भिरा(डा?)*द्युपचारयुक्ताः मुक्ताहारादिभूषणभूषिताः गजाद्यारूढैः स्वस्वपण्डितैः परिमण्डितप्रान्तप्रदेशाः आन्दोलिकाद्यारूढैः गाढाभ्यस्तगानलब्धमनोरथैः मागधैः सनाथाः सादराधिकरागान्धीकृतसमूलमनःपूगाभि(ः) भोगयोषाभिः[१] नारायणीप्रमुखाभिः रथाद्यारूढाभिश्च अलङ्कृतसमीपभूभागाः [२]गुलिकादिसंङ्घ[ा]टितनलिकाभिरामैर्योद्धृकामैः अतिभूमैः

(टि०) १. 'भोगवारुलु' इति आन्ध्रव्यवहारे प्रसिद्धं वाराङ्गनानां नामानुसृत्यैवमुक्तम्। २. अग्निगोलः 'बुल्लेट्' इति आङ्गलभाषाया ख्यातः।

---

* MS. has only कुम्भिराद्युपचार. The 'Waving of Light' set on a pot is known as Kumbha-hāratı, and *Kumbhıra* may be a corruption thereof, otherwise no act or article of honour called '*Kumbhıra*' is known, ıt may be 'कुम्भिराड्' meanıng 'elephant', which ıs taken ın front or used as vehicle as a mark of honour.

(अतिभीमैः ?) योधस्तोमैरपि वस्ताद्यायुध(ध)रैः,[1] तुरगवरैश्चान्यैश्च जन्याङ्गण-धन्यैः सान्द्रीकृतपूर्वपश्चाद्भागाः, भेरीरवनाराचसुदूरीकृतशूराहितनारीमणिघो(रा)-रवपूराहृतघोरासुरकोटीरतटसुघटितरत्नराजिनीराजिताङ्घ्रिपद्माः[2] **श्रीकालिङ्गराय-रङ्गनायकदेवनायकश्रीवेदाचल**महीपालप्रभृतयः शनैः शनैस्तदुद्यानोन्मुखतया गमनकेलिं चक्रिरे । तदनु,

विवेकी 'सखे! स महाराजः **कालिङ्गराड**भिधानः सर्वैः सह स्निग्धैरत्रा-गन्तुं प्रस्थित इव भाति । तथाहि—

भेरीरवः प्रबलकाहलिकारवश्च
[3]सारीसृपं *नगरमिन्द्रपुरं च भित्त्वा ।
दूरीकृताखिलरिपूच्चयगर्वभारः
पारीणतां भजति शत्रुविभेदनाब्धेः ॥ १११ ॥'

इति तूष्णीं क्षणमात्रं स्थित्वाग्रे समायान्तं महागिरीन्द्रनिभं करीन्द्रमवेक्ष्य—'सखे! महाराजः समागत एव; पश्य पश्य! तथाहि—

राजन्मरालध्वजशोभमानं कूजन्महायन्त्रितितर्ज्यमानम्[4] ।
आजन्तमायान्तमगोपमानं[5] राजास्य[6] पश्येह करीन्द्रमेनम् ॥ ११२ ॥

(टि०) १. किमिदं 'वस्ता'नामक आयुध इति केयं भाषेति वा न ज्ञायते; उपरि चैकत्र 'वस्ता' इति विलिख्य तत्पदं शोधयित्वा 'खड्ग' इति प्रसिद्धः संस्कृतशब्दो लिखितः, यतः खड्गवाच्ययं शब्द इति भाति। २. निर्जितप्रतिपक्षशूराणां या नार्यः तासा घोरकरुणाक्रन्दितैः आनीता राक्षस-गणाः, तैः निबिडीभूतपरिसरा इति भावः। समरभूमिनिहताना भक्षणार्थं रक्षांसि आगच्छन्तीति कविसमयप्रसिद्धं वर्णनम्। ३. सारीसृपं नगरं नागलोकः। ४. कूजता शब्दं कुर्वता महायन्त्रा हस्तिपकेन अतितर्ज्यमानम्। ५. पर्वतोपमम्। ६. चन्द्राननेति सख्युः संबुद्धिः।

* MS. सृपन्नगरं.

किंच—

पदातिपङ्क्तीर्नलिकाभिरामाः
संख्याविहीनाश्च समापतन्तीः ।
स्व(वल्)मीकमुख्यादिव[1] निस्सरन्तीः
पं(?)प्रियावलीः* (फण्यावलीः?) पश्य सखे लसन्तीः ॥११३॥

तुरगिणश्शितखड्ग†धरानिमान् परगणातिभयंकररूपकान् ।
सुरगणानिव पश्य जयोद्भटान् शरगणावृततूणयुतांसकान् ॥११४॥'

तदा खलु कविवाक्यम् ।

[2]हूणानां भीतिरित्या(सी)‡त् प्राणानां हानिरुद्भवेत् ।
बाणानां निकरैरेषां तूणानां निचयोद्धृतैः[3] ॥ ११५ ॥

अति०—'किमेतस्य साम्राज्यं शौर्यं च वक्ष्यामि । सखे! किं बहुना? पर्यवसितार्थ उच्यते; श्रोतव्यम् । तथाहि—

धर्मे वा न समो लोके क्षान्तौ वा कोऽस्ति भूपतेः ।
शौर्ये वास्ति समः को वा धैर्ये वास्य महात्मनः ॥ ११६ ॥'

वि०—'सत्यं सत्यम् । एतत्साम्यमेतस्मिन्नेव ।'

(टि०) १. वल्मीकान्निर्गच्छन्तीः सर्पावलीरिव । २. हूणा आङ्ग्लाः । ३. तूणानां निचयेभ्य उद्धृतैरिति अन्वयः ।

---

* 'प्रि' may be read as व्रि also, but the word here seems to be फण्यावलीः, 'rows of snakes'.

† First written word वस्ता is scored over and then खड्ग is written.

‡ MS. One letter missing.

अति०—'महाराजः समीप एव आगतः, तत्समीपवृत्तीनि च वाद्यान्यागतानि यस्मात्। इमानि च वाद्यान्यत्यद्भुतानि खलु। तथाहि—

वाद्यानि श्रवणमनोहराणि धीमन्
श्रोद्यानि(?)* शृणु च महासुखावहानि।
मोद्यानि प्रभुभिरमीभिरद्भुतानि
[1]प्रोद्यानागमनविलासलक्षणानि ॥ ११७ ॥

अतिमधुराणीमानि वाद्यानि, तेभ्यः व्यावृत्य(वर्त्य)मान(म)पि मनः बलादेव आकर्षन्ति हि। स महाराजः समागत एव। पश्य पश्य; नवरत्नखचितहेमसिंहासनसान्द्रं गजेन्द्रमारूढो महेन्द्र इव।

किंच—

पार्श्वद्वये वेदगिरीन्द्ररङ्गभूपालवर्यौ लसतोऽस्य राज्ञः।
गजेन्द्रपृष्ठोपरिबद्धरत्नप्रत्युप्तहेमासनवृत्तिभाजः ॥ ११८ ॥

अपि च—

पश्चाच्च भीमण्णविभुर्महात्मा
राज्ञोऽस्य मन्त्री नितरां विभाति।
समस्तमन्त्राण्यपि(मन्त्रा अपि)चैन(येन?)साकं
भूपेन चानेन सदा क्रियन्ते ॥ ११९ ॥

(टि०) १. प्रोद्यानं प्रस्थानम्, आगमनं, विलासः, एषाम् अवसराणां लक्षणभूतानि।

---

* The meaning is not clear, the metre is impaired and on top of श्रो, two other letters are also found written (अत्?).

राजरायः करीन्द्रेऽस्मिन् भ्राजते चास्य मन्त्रिराट्।
राजमानोरुकेयूरः [1]श्रीजमानहरः श्रिया ॥ १२० ॥

मागधाश्च गजारूढा रागकोटिविशारदाः।
भागधेयाधिकाः सर्वे भोगवन्तोऽस्य यान्ति हि ॥ १२१ ॥

एवम्,

पण्डिताः सुमहात्मानः कुण्डलद्वयशोभिनः।
चण्डकुम्भीन्द्रवाहाश्च मण्डनायास्य यान्ति हि ॥ १२२ ॥'

वि०—'सखे! तिष्ठ। राजमुख्येषु मध्ये एकस्यैव परिवारो अवाङ्मनसगोचरः। इदानीं त्रयाणामपि राजशिखामणीनां परिवारत्रयमपि सङ्गतं सागरत्रयमिव दृष्ट्वैतत् कस्य वा विमतस्य भीतिर्न स्यात्। एतत्पक्षस्थितिशालिनामस्मदादीनां तु नेत्रसहस्रमपेक्षितमेतद्दर्शनाय।'

अति०—'सखे! भवदुक्तं द्वयमपि सत्यमेव।'

वि०—'सखे! किंचित् पृच्छ्यते च। अत्र [2]सावधानेनोत्तरं देयम्।'

अति०—'किं तदिति सावधानोऽस्मि उत्तरं दातुम्।'

वि०—'सखे! अयं को वा कालः? वर्षम्(आ)गच्छेदिव भाति[3]। अथवा एतन्महाराजदर्शनजपुण्येन हतं किं ते तन्मौर्ख्यम्। आस्तामिदं शृणु। इमे महाराजाः ब्रह्मविष्णुरुद्रा एव खलु। किमेषामप्यजय्याः केचित् स्युः? तदधुना वर्णाश्रमधर्मोच्छेदकारिणीमेतन्नीचोद्धतिं[4] कथं सहन्ते? ब्रूहि।'

(टि०) १. श्रीजः मन्मथः। २. सावधानेन भवतेति शेषः। अथवात्रापि द्राविडसंभाषणशैलीमनुसृत्य सावधानशब्दः अवधानार्थे प्रयुक्तः। ३. अयमपि वाक्यप्रयोगः द्रविडभाषणप्रकारमनुसरति। अपूर्वपुरुषसमागमने स्वविस्मयमेवं प्रकाशयन्ति हन्त! वर्षमागच्छेत्! इति। ४. नीचोद्धतिः आङ्ग्लानां समुच्छ्रयः।

अति०—'पूर्वं रावणाद्युद्धतिं कथं सोढ्वा स्थिताः ? तथा गृहाण। किमास्ते वक्तव्यम् ?'

वि०—'तथैवान्यदस्ति वक्तव्यम्। स्यादेतत्। सखे! महाराजाः सर्वेऽपि उद्यानभूमिं प्रविश्य कृतजगन्मोहनात् स्वस्ववाहनादवरुह्य स्वस्वमन्त्रिदत्त-करावलम्बाः पादपतितशत्रुकदम्बाः, सततवन्दितजगदम्बाः, सदापोषितद्विज-निकुरुम्बाः, वन्दिजनसंगीयमानस्वस्वबिरुद्वादाः, पुरतो नृत्यमान(नृत्यद्)वाराङ्गना-नाट्यदर्शनसञ्जातप्रमोदाः, उद्यानमध्यदेशविद्यमानहृद्यतरकेलिगृहमभि मन्दं मन्दं गच्छन्ति। पश्य पश्य।'

इत्युभावपि ससंभ्रमं गत्वा तदारभटीं पश्यन्तौ स्थितावभूताम्।

तत्रान्तरे सेन्द्रसुराः समेत्य [1]ववर्षुरादाय च पुष्पराशीन्।
नभस्तले कल्पतरोः सहर्षा राजत्रयस्योपरि भूरिभूम्नः॥ १२३॥

अति०—'सखे राजत्रयस्यास्य विभवं विक्रमं वा किं वक्ष्यामि।

तथाहि—

भृत्योद्वीजितचामरातिलसितं भृत्यान्तरप्रोद्धृत-
च्छत्रच्छायनिषण्णमद्भुततरं राजत्रयं पश्य रे।
स्वोद्यद्विक्रमभीतभीतसकलप्रत्यर्थिराजच्छटा-
राजद्रत्नकिरीटचारुरुचिसन्नीराजिताङ्घ्र्यम्बुजम्॥ १२४॥'

वि०—'लोकातीतमेव खलु एतद्राजत्रयं महा(प्रभ)ावम्।'

अति०—'पश्य, एतेषां केलिसदनप्रवेशसमयविनोदजनिताशेषलोक*.

(टि०) १. ववृषुरिति भाव्यम्।

* MS. broken here. Three letters might have been lost.

तथाहि—

नारायणीप्रमुखवारविलासिनीभि-
र्माराभिरामजगती . . . . . ।*
हारातिचारुकुचकुम्भविराजिताभि-
र्नीराजनं भवति चाद्य कृतं हि प(श्य ?) ॥ १२५ ॥

वाद्यानि सर्वाण्यपि चैककाले सन्ताडितान्यद्य भवन्ति धीमन् ।
तच्छब्दभेदावगमोऽपि नैव संजायते केवलघोषमात्रम् ॥ १२६ ॥'

तदनु तद्राजत्रयम् इतरस्त्रिग्धैः साकं केलिसदनं प्रविविशुः (प्रविवेश) । तदनु पण्डितेन्द्रावपि क्वचिद्विश्रान्त्यर्थमुपविष्टावास्ताम् । ततस्तौ किंचित्कालं विश्रम्योत्थाय,

वि०—' सखे एतदुपवनदर्शनेनात्मानं विनोदयावः ।'

इत्युपवनदर्शनाय गतावभूताम् । तदनु,

वि०—' सखे वन . टिकान्† वृक्षान् पश्यानन्दकरान् ।

तत्तत्फलोद्भासितदीर्घशाखवृक्षा [1]इवाभान्ति महान्त एते ।
[2]एतद्दिदृक्षागतपाणिराजत्फलोपहारामरतल्लजास्ते ॥ १२७ ॥

(टि०) १. इवकारस्य अमरतल्लजा इत्यनेनान्वयः । २. एतद्दिदृक्षा चेन्नपुरीप्रभुदिदृक्षा ।

---

* MS. After *Jagatī* there should be a word to denote these patrons as '*Jagatīpati-s*' or a further word as an adjective to *Vāra-vilāsinī-s* attached to these patrons; may be 'जगतीपतिकामिनीभिः'.

† MS. One letter (घ?) before टिकान् indistinct by a hole in the leaf.

किंच—

मल्लीनामप्यमल*कलिकासंवृतेयं पुरस्तात्
वल्ली मत्तभ्रमरनिकरोत्तुङ्गझंकारयुक्ता ।
गीतिप्रौढा सकलनृपतीन् स्वीयमोहानुविद्धान्
कर्तुं वेश्या दशनविततिं दर्शयन्तीव भाति ॥ १२८ ॥

अपि च—

इदमहोऽस्ति(मिह्रास्ति) महाकमलाकरं नृपवनं[1] पवनं शुभमावहत् ।
सकलपुष्पफलाढ्यमहीरुहं घनवनं नवनन्दनवद्दधत्[2] ॥ १२९ ॥'

इत्युभावपि उपवनमानन्दितत्र(त्रि)भुवनं वर्णयन्तावेव किंचिद् दूरं गत्वा पद्मिनीं तां राजशोभिततटान्तामपश्यताम् । तदनु,

वि०—'सखे पश्य महाराजं **वेदाचलमहीपालं** शैवशिखामणिम् ।

तथाहि—

कस्याश्चित् स्तनतटयोर्जलं किरन्तं
श्रीवेदाचलनृपतिं करेण को वा ।
दृष्ट्वा पङ्कजनिचयैश्च ताडयन्तं
लिङ्गार्चामिति तनुते न† वेद सोऽयम्[3] ॥ १३० ॥

(टि०) १. नृपाणां प्रभूणां वनं समूहम् आवहत् बिभ्रत्; शुभं पवनमावहत् वीजत् । २. महीरुहं दधद् घनं निबिडं वनमित्यन्वयः । ३. स्तन-मण्डलयोः लिङ्गरूपणेनैवमुत्प्रेक्षा ; यत्तज्जलसेकः, जलजैश्च तत्ताडनं ततो लिङ्गस्य जलाभिषेकं जलजार्चनं च सोऽयं महाराजः करोतीति को वा न वेदेति ।

---

* MS. विमल. † MS त.

किंच—[1]तमपि महाराजं कस्याश्चित्कराम्बुजेन जलप्रवाहं सृजन्तम्[2]। तथाहि—

पदं पर(रं)मे विदधेऽद्य नङ्गां (गङ्गां)
पुरा का राजसं (कराम्बुजाभ्यां) बहुधा करोत् (मि)।*
इतीव धीसंवलितोऽस्ति पश्य
श्रीरङ्गराडम्बु किरन् परस्याम्[3] ॥ १३१ ॥

सखे! इमं पश्य महानुभावं **श्रीकालिङ्गमहाराजम्** अभिषिञ्चन्ती काचित्परं शोभते। तथाहि—

कालिङ्गक्षितिपतिमम्बुभिः कराभ्यां
सिञ्चन्ती कमलचयैश्च ताडयन्ती।
[4]मत्वा तस्य(तत्-?)निजस्व(सुर?)रूपमादरात्तम्
भक्त्या काचिदिव प्र(वि)भाति चार्चयन्ती ॥ १३२ ॥

श्रीरङ्गनायकविभोरुपरि प्रकामं
धीरा करोति जलवृष्टिमियं मृगाक्षी।

(टि०) १. तमपीति प्रभोरन्यस्य वर्णनम्। २. पश्येति शेषः। ३. अन्यस्या जलप्रवाहं करयन्त्रपीडनेन सृजन् रङ्गराज एवं मन्यत इव—पुरा मम पदमेव गङ्गामाकाशगा जनयामास, अद्य मम कराभ्यामपि गङ्गा प्रवहत्विति; तस्मिन् विष्णुत्वबुद्ध्यैवमुत्प्रेक्षा। ४. 'मत्वा तन्निजसुररूपमादरात्तम्' इति पाठः स्यात्; तन्निजरूप तस्य प्रभोः देवावतारत्वेन वर्णितत्वात्, तद्वास्तवदिव्यस्वरूपं मनसि कृत्वा तमर्चयन्ती भातीत्यर्थः।

* MS. corrupt; my reconstruction is offered in brackets.

रम्भोर्वशी भवति पश्य तिलोत्तमा वा
गम्भीररूपरुचिरा प्रविभाति धीमन् ॥ १३३ ॥'

इति । स कालिङ्गमहाराजः सर्वैरपि सुहृद्भिः साकं जलक्रीडां विधाय पश्चाच्च तेषामातिथ्यं चक्रे । तथाहि—

आतिथ्यं विदधे तदा खलु महत्कालत्रयासंभवं
श्रीकल्पद्रुमकामधेनुमुखदुस्साध्यं क्षितीन्द्राग्रणीः ।
आश्चर्यं न विधेयमत्र भगवान् ब्रह्मैव[1] चेदिच्छति
न्यूनत्वं किमियात्समस्तभुवनश्रेणीविधानोद्यमः ॥ १३४ ॥

तदनु स महाराजः भुक्त्वोत्थितै राजभिः सह केलिवनं प्रविश्य सहैव तैर्धृत-चन्दनताम्बूलपुष्पहारः सन् अनेकाभिर्वारवनिताभिः सह केलिवार्तां कुर्वन्, सर्व-जगत्प्रकाशकारणे सहस्रकिरणे अस्ताचलमस्तकमुपेयुषि सति कालत्रयासंभावितं सदो महत्कर्तुमुपचक्रमे ।

तदनु पण्डितेन्द्रौ च भगवतीं सन्ध्यामुपास्य सदःप्रवेशाय अगच्छताम् । तदनु तौ तत्तादृशं सदो दृष्ट्वाश्चर्याब्धिमग्नौ निश्चलावभूताम् ।

यत्रानन्दकरे सदस्यतितरामेकत्र विद्वज्जना-
श्चैकत्रापि कवीश्वराः सुकुशलाश्चैकत्र सद्वैणिकाः ।
एकत्रापि च मागधाः पटुतराश्चैकत्र वाराङ्गना-
श्चैकत्रापि च वन्दिनो जयगिरश्चैकत्र वेत्र्युत्तमाः[2] ॥ १३५ ॥

(टि०) १. कालिङ्गरायः ब्रह्मावतार इति समाधिनैवमुच्यते ।
२. वेत्रदण्डभृतः सेवकाः ।

वि०—'सखे! महाराजस्यास्य सोमवासरः सदःकरणाय कुतः प्रशस्तोऽभूत्? वक्तव्यम्। न वक्तव्यमेव वा भवता, मया त्वित्थ ज्ञायते। शृणु—

लक्ष्मीर्या निजमन्दिरे वसति सा सोमस्य सोदर्य(सौ)
तस्मात्तद्दिवसो मया सुनितरां श्लाघ्यः सदेत्यादरात्।
[1]एषः सर्वधनाधिकाधिकतरः कालिङ्गभूभृद् ध्रुवं
चक्रे तद्दिवसं समस्तदिवसश्लाघ्यं सखे सत्तमः ॥ १३६ ॥'

अति०—'सखे! भवन्मनसि यद्भाति तदेव स्यात्।'

इति तत्सदस्सन्दर्शनजनितानन्दतुन्दिलीकृतात्मानौ मन्दं मन्दं सदः प्रविविशतुः। ततः स महाराजोऽपि सर्वैः सह समुत्थाय तौ स्वसममेव स्थापयामास। तदनु,

विवेकी तत्रत्यान् राजशिखामणीन् पण्डितादीन्विशिष्य विशिष्य *ज्ञातुमुद्युक्तः प्रष्टुमारेभे। तथाहि—

'राजत्रयं ज्ञातमिदं त्रिलोकप्रसिद्धमस्यास्ति समीप एव।
कोऽसौ महानद्भुतरूपशाली **वेदाचलेन्द्रेण** सदास्ति खेली ॥१३७॥'

अति०—'सखे! प्रष्टव्योऽयं महानुभावो वक्तव्यश्च, येनायमपि राजत्रयसमानधर्मा संपत्त्या। तथाहि—

पुरी चास्ति महत्यस्य **पुष्पकानन**नामभाक्[2]।
[3]**संरुध्यदास्यकलनानाथ**स्तत्रास्ति विश्रुतः ॥ १३८ ॥

(टि०) १. असाधुरेषः। २. एतत्संस्कृतनाम च कस्य चेन्नपुरीनिकटवर्तिशैवक्षेत्रस्य द्राविडनाम्नो विवर्त इति अभ्यूहितुं न शक्यते। ३. 'तड्डत्ताट्कोण्डनाथर्' (தடுத்தாட்கொண்ட நாதர்) इत्यस्य शिवमूर्तिविशेषस्य द्राविडनाम्नः संस्कृतपरिवर्तोऽयम्।

* MS. Letter ज्ञ not correctly written.

तदालयं चकारासावुत्सवादीन् करोत्यलम् ।
अप्रमेययशाः सोऽयं विप्रमुख्यांश्च सर्वदा ॥ १३९ ॥

सुप्रसन्नमुखो भूत्वा सुप्रथान् कुरुते धनैः ।
गोपालभूपतिर्नाम्ना प्रसिद्धोऽस्ति महीतले ॥ १४० ॥

किं बहुना? एतद्वृत्तान्तसार उच्यते श्रूयताम् । तथाहि—

सर्वेषां जगतामहं प्रभुरलं नात्रास्ति सन्दिग्धता
सर्वज्ञः परमेश्वरो मम च राडत्रापि कार्या न सा[1] ।
इत्थं बोधयितुं जनानिह महाशैवोऽभवत्तत्त्वतो
गोपालः पृथुपुष्पकाननपुरीनाथेशपूजारतः ॥ १४१ ॥'

वि०—' सखे ! अयमपि महान् ज्ञातव्योऽस्ति । तथाहि—

श्रीमद्रङ्गयनायकक्षितिभुजा साकं समैकासिकां
कुर्वन् सर्वकलाविशारदमतिस्तत्रापि **गीतिप्रियः** ।
कोऽसौ राजशिखामणिर्वद सखे सर्वोत्तमो दृश्यते
ज्ञानेच्छास्य भवत्यलं मम ततो वक्तव्यमाशु त्वया ॥ १४२ ॥'

अति०—' सखे! सर्वेऽपि मे(पीमे) शतकृत्वः सहस्रकृत्वश्च दृष्टाः ज्ञाततराश्च ते । तदप्यजानन्निव पृच्छसि । पृच्छ पृच्छ । सर्वदोत्तरं दातुमहमेको लब्धः[2] । शृणु, वदामि—

तोयाद्रिनाथाधिकभक्तियुक्तः श्रेयांसि भूयांसि जगाम योऽसौ ।
सोऽयं महान् **वेङ्कटशैलनामा**[3] प्रायेण राजत्रयसन्निभश्च ॥१४३॥'

(टि०) १. सा सन्दिग्धता । २. इदं द्राविडसंभाषणशैलीमनुगच्छति
३. वेङ्कटाद्रिरिति पूर्वमुक्तः ।

विवेकी तद्वाक्यादागतस्मृतिः सन् 'स एवायम्' इत्युक्त्वा पुनश्च राजत्रयसमीप एव विराजन्तं महापुरुषमेकं दृष्ट्वा 'कोऽसौ' इति प्रश्नमकरोत्।

अति—'सखे ! शृणु—

मक्काषण्मुखभूपतिः परगणन्यक्कारदक्षः सुधी-
धिक्कारासहमानसः सुनितरां दृक्कान्तिधूताम्बुजः।
[1]रुक्कामाधिक एष एव विलसत्स्रक्कामभाक्[2] सर्वदा
[3]दिक्कालादिविशेषवेदनपटुः शुक्कार्यदूरात्मकः[4] ॥ १४४ ॥'

विवेकी 'अयमेव वा स महाराजः ? साक्षात् षण्मुख एव, न सन्देहः' इत्युक्त्वा पुनश्चैकं महापुरुषं दृष्ट्वा प्रष्टुमारेभे—

'सखे मूर्तेन धर्मेणेव महाराजेन **कालिङ्गभूपतिना** साकं परिहासकेलिं सदा कुर्वन् वर्तते ; कोऽसौ गम्भीरपुरुषः ?' इति।

अति०—

'**भीमण्णप्रभुरयमस्य मुख्यमन्त्री** कामं तद्धितकरणैकसक्तचेताः।
कामं स्वद्युतिजितमादधाति पश्य प्रेमार्द्रं हृदयमहो विधाय धीमन्॥१४५॥'

विवेकी 'अयं रसिकाग्रेसरत्वेन प्रसिद्धो महानुभावः' इत्युक्त्वा पुनश्चैकं पुरुषं दृष्ट्वा पप्रच्छ 'कोऽयं महानुभावो लक्ष्यते ?' इति।

(टि०) १. रुक् रुचिः, तया कामाद् मन्मथादधिकः। २. सृक् सर्जनं दानं; विलसन् दाने कामः अभिलाषः, तं भजतीति; दानशील इति यावत्। ३. देशकालाद्यौचित्यज्ञानसमर्थः। ४. शुक् शोकः, तत्कार्यदूरः आत्मा मनो यस्य सः।

अति०—

'[1]धीमन्नसौ नाट्टरुणाचलेन्द्रः श्रीमाननेकाभरणातिसान्द्रः ।
प्रेमास्पदं राजशिखामणेश्च श्रीमद्भवानीपतिभक्तियुक्तः ॥ १४६ ॥'

विवेकी 'सखे! अयं महाप्रसिद्धः श्रुतपूर्व एव' इत्यभिधाय पुनश्चाह—'सखे! अयमपि महाधर्मिष्ठ इव भाति । कोऽसौ? ब्रूहि' इति ।

अति०—

'अयमादिपुरीन्द्राख्यो[2]* मन्त्रिराडस्य भूपतेः ।
काञ्चीपुरीश्वरैकाम्र†नाथभक्तिविराजितः ॥ १४७ ॥
एवंविधाश्च बहवो वक्तुं शक्तिर्न मेऽस्ति हि ।
‡वर्तन्ते खलु बुद्धिमन् तेषां प्रश्नो न कर्तव्यः ॥ १४८ ॥'

विवेकी 'अस्तु तथा' इत्युक्त्वा पुनश्च कांश्चिद्विशेषेण प्रसिद्धान् प्रष्टुमारेभे—'सखे! कोऽसौ भूपतिल्लामो राजत्रयसमानधर्मा[3] महानिव भाति?' इति ।

अति०—'सखे! त्वत्कापथ्यमिदानीं ज्ञातम्, येनेममपि राजत्रयसमानधर्माणमजानन्निव पृच्छसीति । तिष्ठतु तावत् । महानेषः, श्रूयताम्—

(टि०) १. धीमन्निति विवेकिनः संबुद्धिः। 'धीमान्' इति नायकवर्णनपरतया पाठस्समीचीनतरःस्यात्। २. आदिपुरीश्वरस्य आख्येवाख्या यस्य सः; 'त्यागराज' इत्यस्य नाम स्यात् । ३. राजत्रयं कालिङ्गराज-देवनायक-श्रीरङ्गराजाभिधानां राज्ञा त्रयम् ।

* MS. Written over, indistinct

† म्र according to colloquial Tamil.

‡ The second line of the Anuṣṭubh represents an archaic variety thereof; if the third and fourth quarters are reversed, the more familiar classic cadence as in the first and second quarters will result. Cf Anuṣṭubh *pāda-s*, pp. 370-(39*b*) and 374 (58*d*).

राजश्री**रवणप्प**भूपतिरसौ[1] भोजोऽपि नैतत्समो
राजा चान्ध्रवणिग्जनस्य भगवत्पूजारतः सर्वदा ।
राजानन्दकरः समस्तविबुधभ्राजत्सभामध्यभू-
[2]राजन्सर्व**सितास्य**मोहनपटुः[3] श्रीजानिरेव ध्रुवम् ॥ १४९ ॥'

विवेकी 'सखे! अयं तादृश एव न सन्देहः' इत्युक्त्वा 'अयमपि महापुरुषः कश्चिल्लक्ष्यते; कोऽसौ?' इति पुनः पप्रच्छ ।

अति०—

'**शेषाचल**कुलाम्भोधिदोषाकरवरः सखे!
एष एव महान् [4]सर्व**भूषणीया**दिभूपतिः ॥ १५० ॥'

विवेकी 'अयमेव वा?' इत्युक्त्वा पुनः कंचिन्महापुरुषमपृच्छत् 'कोऽसौ दृश्यते कर्ण इव?' इति ।

अति०—सखे!

'**कोटकृष्ण**[5] इति यः शुभनामा धाटिरस्य महती खलु धा(दा)ने ।
कोटिरप्यसदृशी सुविभूनां पेटिरार्यगुणरत्नचयानाम् ॥ १५१ ॥'

विवेकी 'सखे! महानेवायं दानजितराधेयः' इत्यभिधाय पुनश्च प्रष्टुमुपचक्रमे—'कोऽसौ [6]संस्थानाधिपतिर्महान् वर्तते?' इति ।

(टि०) १. कोल्लु-रवणप्प इति कोत्तवाल्-आपणे कन्यकापरमेश्वरी-देवस्थानस्य स्थापयिता, तद्धर्मकर्ता च । २. मध्यभुवि राजन् इति छेदः । ३. सितास्या ऐरोपीयाः । ४. भूषणीयाः स्वर्णवणिजः । ५. 'कोट' इति चेन्नपुर्यान्ध्रवणिक्षु दृश्यमानेषु कुलनामसु अन्यतमम् । ६. संस्थानमिति आस्थानस्य राज्यस्य च पर्यायः दक्षिणदेशप्रयोगप्रसिद्धः ।

अति०—

'वेङ्कटाचलभूपालो वणिग्राजः कुलक्रमात् ।
[1]कच्छपेश्वरभक्तोऽयं स्वच्छबुद्धिर्महान् सखे ॥ १५२ ॥'

विवेकी 'सखे! अयं कुलीनः ससांप्रदायिक[2] एव।* ....
†इत्युदीर्य पुनः पृष्टं तेन[3], 'कोऽसौ महानुभावो राजत्रयसमानधर्मा?' इति ।

अति०—

'लिङ्गप्पप्रभुरप्यशेषवणिजां राजा च पूजां सदा
त . . स्य महेश्वरस्य कलयन् विप्रांश्च संप्रीणयन् ।
धर्मान् वेदपुराणशास्त्रकथितान्निश्शेषमेवावहन्
अर्थाधिक्यनिरस्तयक्षपतिरध्यास्ते पुरीमेष सः ॥ १५३ ॥'

विवेकी 'एवमेव वा स महाराजः?' इत्यभिधाय पुनः पप्रच्छ महापुरुषमेकमुद्दिश्य ‡'(कोऽयं महा)पुरुषः?' इति ।

(टि०) १. 'कच्चालेश्वर' इति संप्रति व्यवहृतः; तदालयधर्मावेक्षकोऽयम् । २. साप्रदायिकशब्दः संप्रदाय इत्यर्थे द्राविडप्रयोगानुरोधेन प्रयुक्तः । ३. अत्र वाक्यं प्रथमया विभक्त्या उपक्रम्य तृतीयया उपसंहृतम् ।

* From here the leaves and hand are different and represent probably the remnants of an older copy These last seven leaves were in wrong sequence, some of them having been inserted on the thread in reverse order

† MS. This was found wrongly as fifth of the last seven leaves; also it was inserted in the thread in the reverse order.

‡ Gap in the MS due to the damage in the leaves. Other gaps or suggestions in brackets show a similar defect in other leaves also.

अति०—

'[1]एषस्सोऽप्यरुणाचल[2]प्रभुमणिर्वैश्यो . . . . हनि
श्रीमच्चेन्नपुरे सुरेशसमतोदारं कुमारं भजन् ।
मन्त्रं(त शि)वपञ्चवर्णघटितं नामादधानः सुधी[3]-
स्तद्धस्ते सकलं प्रभुत्वमधुना (दत्वा?)त्र यो मोदते ॥१५४॥'

विवेकी 'सखे! अयं महाराजः त्रिलोकप्रसिद्धः सांप्रदायि(को रा)जत्रय-समानधर्मा' इत्यभिधाय पुनः कंचन प्रभुमुद्दिश्य सांप्रदायिकं, को(ऽयमिति प)प्रच्छ ।

अति०—

'चक्रवर्तीति नाम्नासौ चक्रवर्ती महीभुजाम् ।
नागप्पभूपतेः (पुत्रः?)*(त्या)गशाली महात्मनः ॥ १५५ ॥'

विवेकी 'सखे! अयं च महाप्रबल एव' इत्यभिधाय . . . . . . कंचन बालकं प्रभुमणिमुद्दिश्य पृष्टमासीत् ।

अति०—

'मारभूपालपुत्रो(ऽय) वीरराघवभूपतिः ।
करिकृष्णाख्यभूपालपौत्रः प्रभविता च यः ॥ १५६ ॥'

(टि०) १. 'एषस्सः' इत्यसाधुः प्रयोगः । २. यः 'नाट्टु'अरुणाचल इति पूर्वं वर्णितः स एवायं स्यात् । ३. 'नमः शिवाय' इति शिवपञ्चाक्षरमन्त्रस्य नामत्वेन 'नमःशिवायमुदलियार्' इत्याकारेण स्वीकारः द्राविडेषु प्रसिद्धः । तच्च नाम स्वकुमाराय आदधानः । लौकिकं सर्वं व्यवहारं कुमारहस्ते दत्तवानित्यर्थः ।

---

* Another leaf begins here; this one was found as the seventh.

विवेकी 'एवं चेद्दीर्घायुष्मान् भूत्वा योगं महान्तमवाप्नुयात्' इति तमनुगृह्य **प(ण्डि)तान् विप्रप्रभून्** कांश्चिदुद्दिश्य पुनः प्रष्टुमारेभे—'सखे! पण्डिताग्रेसरः कोऽसौ ? वक्तव्यो महानुभावः।'

अति०—'सखे! स महात्मायम्—

न्यग्रोध(ाङ्घ्रिप ?)मूलवासरुचिभाग्देवो जटाभारभृद्
ब्रह्मश्रीशमुखान् स्वत(त्त्वक)थनाद्धन्यानतानीत् पुरा।
अज्ञानाधिकपङ्कमग्नजनतामुद्धर्तु(कामः ?)सुधी-
रास्ते योऽयं समस्तशास्त्रनिपुणः **पट्टाभिरामा**(भिधः?)[1]॥१५७॥'

विवेकी 'अयं महाविद्वान् प्रसिद्ध एव' इत्यभिधाय पुनश्च कंचन महापुरुषमुद्दिश्य अपृच्छत् 'कोऽसौ महाविद्वान्?' इति।

अति०—'सखे! स खल्वयम्—

स्थितः . . . .

*पुत्रः पण्डितः, सोऽयं प्रसिद्ध एव।'

सकोपम्—'अरे प्रसिद्धः; स च (प्रसि ?)द्धश्चेत् किम्? तव प्रश्नकरणे न्यूनता नास्ति खलु। इतः परं वा तू(ष्णीं भव)न् तिष्ठ। अयं च महापुरुषः कश्चिद्वर्तते द्रष्टव्यः; स महानुभावः। तथाहि—

राजानः सकले(ला) जिताः परमहो जेतव्य इत्यद्रिरा(ड्)
(आलो)च्याखिलहूणराजनिकरैर्मेरुर्जितोऽभूत्ततः।

(टि०) १. अयं विद्वान् दक्षिणामूर्त्यवतार इत्युत्प्रेक्ष्यते।

---

* MS. This was the penultimate leaf (sixth).

तत्सेवां(विदधद् ?) द्विजेन्द्रमिषभाग् **गिर्यप्प**[1]नामात्र य-
स्तत्सेवा ह्युचिता य ए. . . . स्तस्य प्रभुत्त्वेऽपि च ॥ १५८ ॥

अयमपि **महाविद्वान्** द्रष्टव्यः । तथाहि—

[2] . . . . शतया सदा मम पुनः स्थातुं न चास्ते रुचि-
स्तस्मात्कुत्रचिदेत्य मान . . . . स्थेयं मयेति स्वयम् ।
मत्वा मानुषभावमेत्य भगवान्नारायणो . . .
स्त्यत्यन्तो(न्न ?)तवाहनेन चरतोऽप्याशा हि पद्भ्यां . . ॥ १५९ ॥

सखे! एष च स महान् द्रष्टव्यः, यद्दर्शने मतिरेवं जायते । तथा(हि)—

(ईशा ?)राधनकर्मताप्यथ यथा स्यादीश कार्या दये-
त्येवं दाशरथि(:) . . . . *शिवं संपूजयामास किम् ।
नो चेद्वेद**गिरीश**पूज्यतर . . . स्यता साधिका
स्यादद्य **द्विजराजदम्भविलसद्रामस्य**[3] कस्मा(त्) . . ॥ १६० ॥'

वि०—'सखे! अय महाप्रसिद्ध एव सर्वलोकविदितः । सखे! अयं च **विप्रप्रभुः** सुविल(सो ?) वर्तते; कोऽसौ ?; वक्तव्यः ।'

अति०—'सखे! शृणु—

(टि०) १. गिर्यप्प इति नाम्नि 'गिरि'शब्ददर्शनात्तस्मिन् मेरुत्वमारोप्यैवमुत्प्रेक्षा । २. अयं विद्वान् नारायणावतारतया वर्ण्यतेऽत्र । ३. वेदाचलप्रभोः कार्यावेक्षकः रामो नाम द्विजः रामावतारतया वर्ण्यतेऽत्र ।

* This was found as the second leaf.

साक्षाद्विष्णुरभूत्पुरा द्विजगणान् (मृष्ट?)ान्नभोक्तॄन् परं
कर्तुं मानवतामुपेत्य भगवानेवाच्युताख्यां* वहन् ।
तस्या . . . कस्सुतः परतरः शेषाचलाख्यः[1] सखे
विज्ञेयः प्रभुराश्रितालिसकलाभी(ष्टप्रदानो?)त्सुकः ॥ १६१ ॥'

वि०—'एतत्पिता त्रिलोकख्यात एव। अयमपि तादृश एव स्यात्। यत् यादृशगुणविशिष्टजनितं तत् तादृशगुणविशिष्टमेवेति सामान्यमुखी व्याप्तिः।'

अति०—'सखे! न्यायपाण्डित्यं सम्यक् प्रकटीकृतम्।'

विवेकी 'न परिहास्योऽहं शिष्यः' इत्युक्त्वा महापु(रुषमे)कं साक्षात् परमेश्वरज्ञानदं[2] राजवत् सर्वैश्वर्यसंपन्नं च दृष्ट्वा . . . . न्यासो भूत्वा बभाषे—'सखे! कोऽसौ महानुभावः? वक्तव्यः' इ(ति)।

(अति०—) †'साक्षात्परमेश्वर एव न सन्देहः। श्रृणु वदामि—

अयं गुरुर्वै(श्यमहाजन?)नां स्वयं प्रकाशः परमेश्वरत्वात्।
यतो महिम्नः परमेश्वरोऽसौ . . . . देशिक एव चैषः ॥ १६२ ॥'

(विवेकी) 'तथैव, न विवादः' इत्युक्त्वा पुनश्चैवमवोचत—

'सर्वाभीष्ट . . . . तरि महातेजोविशेषान्विते
ब्रह्माद्यैरखिलैः सुरैरि . . . देवैः समन्ताद् वृते।

(टि०) १. अच्युतपुत्रः शेषाचलाख्यः। २. परमेश्वर एवायमिति द्रष्टॄणां मतिं ददातीति, तम्।

* MS. Line corrupt here.
† This was the first in the set of seven leaves in the end.

अस्मिन् धर्मशिवे सदा नयनयोर्मार्गे चरत्यप्यहो
. . . . गगोचरं किमिति वा घुष्यन्ति शिष्यादयः ॥१६३॥'

अति०—'न केवलं परमेश्वरस्येव . . . . अपि तु स्वरूपमपि ।'

वि०—'सखे ! कथमत्रायमागतश्चैतादृशः ?'

अति०—'राज्ञोऽस्य महा(प्रभा?)वत्वात् सर्वेषामपि प्रीतिरेतदुपरि महत्येव । सखे! कालो महान् जातः[1] । तू(र्णमु?)त्तिष्ठ । इतःपरं राजानोऽपि सर्वे प्रस्थि(स्था)तुमुद्युक्ता इव भान्ति । तथाहि—

वस्त्राणि (च)(म)हार्हाणि सौवर्णानि सुमान्यहो[2] ।
आनीतानि हि सर्वेषां माननायै विपश्चिताम् ॥ १६४ ॥'

वि०—'सखे! अतिविवेकिन्! आवयोरपि यद्भाव्यं तद्भवत्येव । मुञ्च तच्चापल्यम् ।'

अति०—'तर्हि करट इवा . . . .'

वि०—'अस्तु तथैव करोमि । अनतिक्रमणीया हि महदाज्ञा ।' इत्युक्त्वा,

*'(वि)मलाः पट्टिकाः केचित् केचिद् गन्धान् मनोहरान् ।
के(चित्) . . . . . . केचिच्चान्यद्ददत्यलम् ॥ १६५ ॥

(टि०) १. महान् कालोऽतीत इत्यर्थे द्राविडयुक्त्यनुकारीदं वाक्यम् । २. सौवर्ण पुष्प सुवर्णपुष्पं, दक्षिणेति यावत् ।

---

* MS. broken at the ends. This was leaf four; it was inserted in the reverse order.

महाराजोऽपि सर्वेषां स्वयमुत्था(य?) . . . [1]
कुरुते पश्य . . . भावमत्यद्भुतं सखे ॥ १६६ ॥'

अति०—'अत एव खल्वास्ते स . . . .[2] ष्टतयायं सर्वसुहृत्तया च।'

वि०—'सखे! [3]**मणलीपुरपति**गुणवर्णनं कुतो न कृतं वा? तद्वक्तव्यम्।'

अति०—'कुतस्तद्विस्मृतिः? शृणु भणामि—

श्रीराजन्**मणली**पुरी . . . . [4]**श्रीमुद्दुकृष्णेन्द्रभू-**
श्रीमद्वेङ्कटकृष्णभूपमहिमापारोऽस्ति तद्वर्ण(नम्)।
. . . पृथगित्यलं हृदि निधायैवात्र तद्वर्णनम्
*. . नैव कृतं तदद्य भव(ता क्ष?)न्तव्यमेतत्सखे ॥ १६७ ॥'

वि०—'एतत्सभासदृशीं सभां कुत्र वान्यत्र द्र(क्ष्या)मि?'

अति०—'न केवलमेवं वक्तुमर्हसि; अपि चैतत्प्रभुसदृशप्रभु(रेव नास्ति?)'

वि०—'तथैव तथैव, न संशयः।'

इति तयोः परस्परवार्ताकेलि . . . . महाराजोऽपि महार्हैरम्बरवरैरन . . . .

. . . . . . †गिरावुरगराड्रूपे प्रभुभ्यः परं
हूणेभ्यः कनक(।) . . . . . शन्नास्ते विभुर्यः सदा।

(टि०) १. अत्र पत्रे त्रुटितं पदं 'सत्कृतिम्' अथवा 'पूजनम्' स्यात्। २. अत्र त्रुटिते भागे 'सर्वप्रकृष्टतयायम्' इति स्यात्। ३. पूर्ववर्णित-आधिपुरी (तिरुवोट्रियूर्) निकटवर्ती पुरातनो ग्रामः। ४. मुद्दुकृष्णमुदलियार् 'पिगाट्' नामकाङ्ग्लशासकसमये प्रमुख आसीत्, यः चेन्नकेशव-चेन्नमल्लेश्वर-देवस्थानयो नूतनतया निर्माता, तद्धर्मकर्ता च बभूव।

---

* The two syllables here scored over. † This was leaf three.

श्रीमद्वेङ्कटनाथनामविलसन् ध(न्या)न् समस्तानलं
तेभ्यः सकथितुं[1] सुधीमणिरभूद् यः सर्वशास्त्र(ज्ञ)राट् ॥१६८॥'

इत्युक्त्वा 'सखे! प्रश्नो न कर्तव्यः, तूष्णीमेव[2] सर्वं वदामि; शृणु । सखे! शङ्करनामकोऽयं प्रभुर्महानुभावः । तथाहि—

पूर्वं (वर्त्म ?)नि वैदिके परमहो स्थित्वा कृतो दिग्जय-
स्त्वद्याहं च सुलौकिके पथि करोम्येवेति तं शङ्करः[3] ।
बुद्ध्या सर्वमहीपतीन् स्ववशतां कृत्वा जगद्देशिको
गार्हस्थ्यं च समेत्य तिष्ठति सुधीर्यस्तेप्र(वारा?)न्निधिः ॥१६९॥'

विवेकी श्रुत्वा तुष्टिं प्रपेदे ।

अति०—'अयमपि स महापुरुषो द्रष्टव्यः ।

आकारं हि विकारदं मम न साध्वेतत्ततो मुच्यते
मत्वेति स्वसह(स्र) . . . . ना(?) सन्त्यज्य नेत्रद्वयम् ।
स्वीकृत्यामरवल्लभो मनुजतामभ्येत्य स . . .
. वेङ्कार . . . . व विभुवर्यात्मा परं वर्धते ॥[4]

वि०—'सखे! उदय . . . .

(एतावानेवायं ग्रन्थ उपलब्धः)

(टि०) १. कथयितुमित्यस्य स्थाने एवमपप्रयुक्तं स्यात् । २. सर्वं वदामि, तूष्णीमेव शृणु सखे इत्यन्वयः । ३. अयं च विप्रप्रभुः । ४. अयम् इन्द्रावतारतया वर्ण्यतेऽत्र ।

BIBLIOGRAPHY

Vestiges of Old Madras 1640-1800, by Henry Davison Love Indian Record Series 3 volumes and index Pub for the Government of India by John Murray, London, 1913

Guide to the Records of the Madras District from 1719 to 1835. Government Press, Madras, 1936

The Madras Tercentenary Commemoration Volume The Oxford University Press, Madras, 1939

Founding of the Fort St George, by William Foster Eyre and Spottiswoode, London, 1902

Manual of the Administration of the Madras Presidency. 3 volumes C. D. Macleane, Madras, 1885-93

Madras in the Olden Time, 3 volumes, by J Talboys Wheeler J. Higginbotham, Madras, 1861, 1907

The Indian Geographical Journal (Series) (The Journal of the Madras Geographical Association) The Indian Geographical Society, Madras

Epigraphia Indica, vol XXVI, 1943-4 The Archæological Survey of India, Delhi.

Kalaśai-k-kovai (Tamil), by Subrahmanya Muni Ed Mm. Dr. U V. Swaminatha Iyer Sen Tamil Publications 61, Madura, 1935

Nungampākkam Kanakappa Mudaliār Vamśa-varalāru (Tamil) N S Rājābāda Mudaliār, Madras, 1948.

Śivasthalamañjarī (Tamil), by T. Subrahmanya Pillai, Madras, 1931

Ānandaranga(vijaya)campū, by Śrīnivāsa. Ed Dr V Raghavan B G Paul and Co., Madras, 1948

Viśvagunādarśacampū, by Venkatādhvarin. Nirnaya Sagar Press, Bombay, 1906.

A Descriptive Catalogue of the Sanskrit Manuscripts in the Government Oriental Manuscripts Library, Madras (Series) Government Press, Madras

The Journal of the Madras Music Academy (Series) Music Academy, Madras.

Catalogue of the Musical Instruments Exhibited in the Government Museum, Madras, by P Sambamoorthy. Bulletin of the Madras Government Museum, New Series—General Section vol II, part 3, 1931.

INDEX OF NAMES